रघुवंशः संजीवनी समाख्य
व्याख्या सहितः

पत्र ४

16.44.   327

ॐस्वस्तिश्रीगणेशायनमः श्रीगोपालायनमः मातापितृभ्यांजगतोनमोवामार्द्धजानये सद्योदक्षिणदृक्पा।
तसंकुचद्वामदृष्टये १ अंतरायतिमिरोपशांतयेशांतिपावनमचिंत्यवैभवं तंनरंवपुषिकुञ्जरंमुखेमन्म।
र॰वं॰ हेकिमपितुन्दिलंमहः २ शरणंकरवाणिशर्मदंतेचरणंवाणिचराचरोपजीव्यम् करुणामसृणैः॥
टी॰ १ कटाक्षपातैःकुरुमामम्बकृतार्थसार्थवाहम् ३ वाणींकाणभुजीमजीगणदवाशासीच्चवैयासिकीमंत
स्तंत्रमरंस्तपन्नगगवीगुंफेषुचाजागरीत् वाचामाचकलद्रहस्यमखिलंयश्चाक्षपादस्फुरांलोकेभूद्य
दुपज्ञमेवविदुषांसौजन्यजन्यंयशः ४ मल्लिनाथकविःसोयंमंदात्मानुजिघृक्षया व्याचष्टेकालिदा
सीयंकाव्यत्रयमनाकुलम् ५ कालिदासगिरांसारंकालिदासःसरस्वती चतुर्मुखोथवासाक्षाद्विदु।
र्नान्येतुमादृशाः ६ तथापिदक्षिणावर्तनाथाद्यैःक्षुण्णवर्त्मसु वयंचकालिदासोक्तिष्ववकाशंलभे
महि ७ भारतींकालिदासस्यदुर्व्याख्याविषमूर्छिताम् एषासंजीवनीटीकातामद्योज्जीवयिष्यति ८
इहान्वयमुखेनैवसर्वंव्याख्यायतेमया नामूलंलिख्यतेकिंचिन्नानपेक्षितमुच्यते ९ इहखलुस
कलकविशिरोमणिःकालिदासः काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये सद्यःपरनिर्वृत

काव्यस्यानेकश्रेयःसाधनताङ्काव्यालापांश्च वर्ज्जयेदित्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च प्रदर्शयन् रघुवंशाख्यं

येकान्तासंमिततयोपदेशयुजे इत्याद्यालंकारिकवचनप्रामाण्यात् महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिस
माप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टदेवतानमस्कारपदिशामत्वादाशीर्नमस्क्रियावस्तुनि
र्द्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् काव्यनिर्म्माणस्य विशिष्टशब्दार्थ
प्रतिपत्तिमूलत्वेन विशिष्टशब्दार्थयोश्च शब्दजातमशेषं तु धत्ते सर्वस्य वल्लभाम् अर्थरूपं यदखिलं धत्ते मु
ग्धेन्दुशेखर इति वायुपुराणसंहितावचनबलेन पार्वतीपरमेश्वरायत्तत्वदर्शनेपि पित्स्यातावेवाभिवादयते
वागर्थाविवेति वागर्थाविवेत्येकं पदं इवेन सह नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं च व।
क्तव्यमेवमन्यदपि द्रष्टव्यं वागर्थाविव शब्दार्थाविव संपृक्तौ नित्यसंबद्धावित्यर्थः नित्यसंबन्धयोरुपमा संबद्धा=
नत्वेनोपादानान्नित्यशब्दार्थसंबन्धः इति मीमांसकाः जगतो लोकस्य पितरौ माता च पिता च पितरौ पिता।
मात्रेति द्वंद्वैकशेषः मातापितरौ पितरौ मातरपितरौ प्रसूर्जनयितारौ इत्यमरः एतेन शर्वशिवयोः सर्व।
जगज्जनकतायां वैशिष्ट्यं शिष्टमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सूच्यते पर्वतस्यापत्यं स्त्री पार्वती
तस्यापत्यं स्त्री पार्वती तस्यापत्यमित्यणप्रत्ययः टिड्ढाणञित्यादिना ङीप् पार्वती च परमे

स्वरश्च पार्वतीपरमेश्वरौ परमशब्दः सर्वोत्तमत्वद्योतनार्थः मातृत्वात्पूज्यत्वादल्पस्वरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः वा
गर्थप्रतिपत्तये शब्दार्थयोः सम्यक्ज्ञानार्थं वंदे अभिवादये अत्रोपमालंकारः स्फुट एव तथोक्तं स्वतःसिद्धेन भिन्नेन
संमतेन च धर्मतः साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमेति प्रायिकस्त्वायमलङ्कारः कालिदासोक्तकाव्यादौ भदे
र॰ वं॰ वताकस्य सर्वगुरोर्मङ्गलस्य प्रयोगाच्छुभलाभः सूच्यते तदुक्तं शुभदो भसिद्देवत इति वकारस्यामृतबीजत्वात्
टी॰ २ च यागमनसिद्धिः १ संप्रति कविः स्वाहंकारं परिहरति क्व सूर्येत्यादिश्लोकद्वयेन प्रभवत्यस्मादिति प्रभवः कार

अहंकविः कालिदासः

ॐ वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वंदे पार्वतीपरमेश्वरौ १ क्व सूर्यप्रभवो
वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् २ श्रीरामचंद्राय नमः

णं उत्पत्तिस्थानं ऋदोरप् अकर्तरि च कारके संज्ञायामिति साधु सूर्यः प्रभवो यस्य सूर्यप्रभवो वंशः क्व अल्पो
विषयो ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा क्व द्वौ क्वौ शब्दौ महदंतरं सूचयतः सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः
उत्तर॰ ५ तथा च तद्विषयप्रबंधनिरूपणं सूचयतः सूर्यवंशमालेवितुं न हि दुस्तरं दुःखेन तरितुमशक्यं ईषद्दुःसु ६ ५
षीत्यादिना खल्प्रत्ययः सागराणां संबंधि सागरः तं सागरं मोहादज्ञानादुडुपेन प्लवेन उडुपं तु प्लवः
कोल इत्यमरः अथवा चर्मावनद्धेन यानपात्रेण चर्मावनद्धमुडुपं प्लवः काष्ठकरंडवदिति सज्जनः तितीर्षु
स्तरितुमिच्छुरस्मि भवामि तरतेः सन्नंतादुप्रत्ययः अल्पसाधनेन महाकार्यं कर्तुमिच्छुरिति भावः इदं च वंशोत्कर्ष
कथनं स्वप्रबंधमहत्त्वार्थमेव तदुक्तं प्रतिपाद्यमहिम्ना च प्रतिबंधो महत्तर इति लक्ष्मणान् २ श्रीरामाय नमः २

अशक्यार्थे प्रवृत्तिमाह मन्द इति किञ्च मंदो मूढः मूढाल्पापटुनिर्भाग्या मंदाः इत्यमरः तथापि कवियशःप्रा
र्थी कवीनां यशः काव्यनिर्माणजातं तत्प्रार्थनशीलोहं प्रांशुना उन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये उद्बाहुः
फलग्रहणायोच्छ्रितहस्तो वामनो ह्रस्वः खर्वो ह्रस्वश्च वामनः इत्यमरः उपहास्यतां उपहासविषयतां ऋहलोर्ण्य
दिति ण्यत्प्रत्ययः गमिष्यामि प्राप्स्यामि ३ मंदश्चेत्तर्हि त्यज्यतामयमुद्योग इत्यत आह अथवेति अथवा प
क्षान्तरे पूर्वैः सूरिभिः कविभिर्वाल्मीक्यादिभिः कृतवाग्द्वारे कृता रामायणादिप्रबंधरूपा वाक् सैव द्वारं प्रवेशो
यस्य तस्मिन् अस्मिन्सूर्यप्रभवे वंशे कुले जन्म नेकलक्षणाः संतानो वंशः वज्रेण मणिवेधकसूचिविशेषेण

लोभाद =

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः ३ अथवा कृ
तवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ४ सोहमाजन्मशु
द्धानामाफलोदयकर्मणाम् आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ५ यथाविधिहुताग्नीनां

समुद्रं अभिव्याप्य आसमुद्रं आसमुद्रं या क्षितिः आसमुद्रक्षितिः आसमुद्रक्षितेः ईशाः आसमुद्रक्षितीशाः तेषां =

वज्रं त्वस्त्री कुलिशशस्त्रयोर्मणिवेधे रत्नभेदे इति केशवः समुत्कीर्णे विद्धे मणौ रत्ने सूत्रस्येव मे गतिः संचारोऽस्ति
वर्णनीये रघुवंशे मम वाक्प्रसारोस्तीत्यर्थः ४ एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनीयं प्रतिजानीते प्रतिज्ञां कुरुते इत्या
र्थः सोहमित्यादिभिः पंचभिः श्लोकैः कुलिकेनाह सोहं रघूणामन्वयं वक्ष्ये इत्युत्तरेण संबंधः किंविधानां र
घूणामित्यपेक्षायां तानि विशेषणानि योजयति आजन्मनः जन्मतः प्रारभ्येत्यर्थः आङ् मर्यादाभिविध्योरित्यभि
विधावव्ययीभावः तत्र शुद्धानां सुप्सुपेति समासः एवमुत्तरत्रापि द्रष्टव्यं आजन्मशुद्धानां निषेकादिसर्वसं
स्कारसंपन्नानामित्यर्थः आफलोदयं आफलोदयसिद्धेः कर्म येषां तेषां तथोक्तानां आरब्धान्तगामिनामि

= जन्म अभिव्याप्य आजन्म आजन्म शुद्धाः ये तेआजन्मशुद्धाः तेषां जन्मतः शुद्धानामित्यर्थः
फलोदयं अभिव्याप्य आफलोदयं आफलोदयं कर्म येषां ते आफलोदयकर्माणः तेषां = नाकं अभिव्याप्य आनाकं आ रथं =
नाकं रथवर्त्म येषां ते आनाकरथवर्त्मानः तेषां = विधिं अनतिक्रम्य यथाविधि यथाविधि हुता अग्नयो यैस्ते यथाविधिहुताग्नयः तेषां =
कामं अभिलाषं अनतिक्रम्य यथाकामं यथाकामं अर्चिता अर्थिनो यैस्ते यथाकामार्चितार्थिनः तेषां =

दृक्तिनेमीशानांसार्वभौमानामित्यर्थः आनाकरथवर्त्मयेषांतेषां इन्द्रसहचारिणामित्यर्थः अत्रसर्वत्रआङोऽभिवि
र॰वं॰ धय्यर्थत्वंद्रष्टव्यं अन्यथामर्यादार्थत्वेजन्मादिषुशुद्ध्यभावप्रसंगात् ५ यथाविधीति विधिमनतिक्रम्ययथावि
टी॰ धि यथासादृश्यणाव्ययीभावः तथाहुतशब्देनसुप्सुपेतिसमासः एवंयथाकामार्चितेत्यादीनामपिद्रष्टव्यं यथा
३ विधिहुताः अग्नयोयैस्तेषांयथाकाममभिलाषमनतिक्रम्यअर्चितार्थिनां यथापराधमनतिक्रम्यदण्डोयेषांतेषां
३ यथाकालप्रबोधिनां कालमनतिक्रम्यप्रबोधशीलानां चतुर्भिर्विशेषणैर्देवतायजनातिथिसत्कारदण्डधरत्वप्र
जापालनसमयज्ञागरूकत्वादीनिविवक्षितानि त्यागायेति त्यागायदानाय त्यागो ६ विहापितंदानमित्यमरः

यथापराधदण्डानांयथाकालप्रबोधिनां ६ त्यागायसंभृतार्थानांसत्यायमितभाषिणां यशसेवि
जिगीषूणांप्रजायैगृहमेधिनां ७ शैशवेभ्यस्तविद्यानांयौवनेविषयैषिणाम् ॥

सत्पात्रेविनियोगस्त्यागस्तस्मैसंभृतार्थानांसंचितधनानांनतुदुर्व्यापाराय सत्यायमितभाषिणांमितभाषणशीला
नां नतुपराभवाय यशसेविजिगीषूणांजेतुमिच्छूनांनत्वर्थसंग्रहाय प्रजायैसंतानाय गृहमेधिनांदारपरि
ग्रहाणांनतुकामोपभोगाय अत्रत्यागायेत्यादिषुचतुर्थीतादर्थ्येचतुर्थीसमासविधानज्ञापकाच्चतुर्थी गृहैर्दा
रैर्मेधंतेसंगच्छंतइतिगृहमेधिनः दारेषुचगृहाइत्यमरः जायाचगृहिणीगृहइतिहलायुधः मेधृसंगमेमेधा
संगमेइतिधातोर्णिनिः एभिर्विशेषणैः परोपकारित्वंसत्यवचनत्वंयशःपरत्वंपितॄणांमातृणांचशुद्धताचविव ३
क्षिता ७ शैशवइति शिशोर्भावः शैशवंबाल्यमित्यमरः प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् इत्यञ्प्रत्ययः तस्मि

नवयसि अभ्यस्तविद्यानां एतेन ब्रह्मचर्याश्रमो विवक्षितः यूनो भावः यौवनं तारुण्यं यौवनं समे इत्यमरः युवादित्वाद।
ण् प्रत्ययः तस्मिन्वयसि अभ्यस्तविद्यानां एते ब्रह्मचर्याश्रमो विवक्षितः वयस्थस्तरुणो युवा इत्यमरः विषयैषिणां भो
गाभिलाषिणां एतेन गृहस्थाश्रमो विवक्षितः वृद्धस्य भावो वार्द्धकं वृद्धत्वं वृद्धमनोज्ञादिभ्यश्चेति वुञ् वार्द्धकं वृद्धसं
घाते वृद्धकर्मणीति विश्वः संघातार्थे तु वृद्धाच्चेति वक्तव्यात् स्वामिहितेको वुञ् तस्मिन्वार्द्धके वयसि मुनीनां वृत्ति
रिव वृत्तिर्येषां एतेन वानप्रस्थाश्रमो विवक्षितः अन्ते शरीरत्यागकाले योगेन परमात्मध्यानेन योगः संहननोपायध्या
नसंगतियुक्तिष्वित्यमरः तनुं त्यजन्तीति तनुत्यजः अन्येभ्योपि दृश्यत इति क्विप् तेषां देहत्यागिनां एतेन मोक्षभा

वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ८ रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन् तद्गुणैः कर्ण
मागत्य चापलाय प्रचोदितः ९ कुलकं तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः हेम्नः संलक्ष्यते ह्यग्नौ
विशुद्धिः श्यामिकापि वा १०

वो विवक्षितः ८ रघूणामिति सोऽहं लब्धप्रवेशो तनुवाग्विभवोपि अल्पवाणीप्रसारोपि सन् येषां गुणास्तैस्तद्गुणैः श्री
जन्मशुद्ध्यादिभिः कर्तृभिः कर्णं मम श्रोत्रमागत्य चापलाय युवादित्वात् कर्मण्यण् चापलं चपलकर्म अविमृश्य
कारणादुपकर्तुं क्रियार्थोपपदेत्यादिना चतुर्थी प्रचोदितः सन् एषामन्वयं अन्वविषयप्रबंधं वक्ष्ये ९ कुलकं स
प्रति स्वप्रबंधपरीक्षार्थं सतः प्रार्थयते तमिति तं रघुवंशाख्यप्रबंधं सदसतोर्गुणदोषयोर्व्यक्तेर्हेतवः कर्त्तारः सन्तः
श्रोतुमर्हन्ति तथाहि हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिकापि लोहान्तरसंसर्गादिदोषोऽग्नौ संलक्ष्यते नान्यत्र।
तद्वदत्र सन्तः एव गुणदोषविवेकाधिकारिणो नान्य इति भावः १० वर्ण्यवस्तूपक्षिपति ॥

वैवस्वतइति मननस्संईषिरोमनीषिणः धीराः विद्वांसइतियावत् पृषोदरादित्वात्साधुः तेषांमाननीयः पूज्यः छंदसांवेदा
नांछंदः वेदेतिविश्वः प्रणवओंकारइवमहीक्षितांप्रथमइति ईशंतेइतिमहीक्षितः क्षियाणोरैश्वर्य्यत्वात्क्विप् नगागमश्चेति
र.वं. पामाद्यः आदिभूतः विवस्वतः सूर्य्यस्यापत्यंपुमान्वैवस्वतोनाम वैवस्वतइतिप्रसिद्धोमनुरासीत् ओंकारप्रणवौसमौ
टी.४ इत्यमरः ११ तदन्वयइति शुद्धिरस्यास्तीतिशुद्धिमान्तस्मिन्शुद्धिमतिनिर्दोषवति अन्वयोवंशोगोत्रंवाऽभिजनःकु
४ लमित्यहलायुधः तदन्वयेतस्यमनोरन्वयेकुले अतिशयेनशुद्धिमान्शुद्धिमत्तरः द्विवचनविभज्येत्यादिनातरप् उ
त्पन्नोदिलीपइतिप्रसिद्धोराजा इंदुरिवराजेंदुः राजश्रेष्ठः उपमितंव्याघ्रेत्यादिनासमासः क्षीरनिधाविन्दुरिवप्रसूतः

वैवस्वतोनाममनुर्माननीयोमनीषिणां आसीन्महीक्षितामाद्यः प्रणवःछंदसामिव ११ तदन्वयेशुद्धिमति
प्रसूतःशुद्धिमत्तरः दिलीपइतिराजेन्दुरिन्दुःक्षीरनिधाविव १२ व्यूढोरस्कोवृषस्कंधः शालप्रांशुर्महाभुजः

जातः ११ व्यूढेति व्यूढेत्यादिभिरष्टभिः श्लोकैः दिलीपंविशिनष्टि व्यूढंविपुलंउरोयस्यसः व्यूढोरस्कः उरःप्रभृ
तिभ्यःकप् व्यूढंविपुलंभद्रंस्फारंसममेवविशिष्टं चेतियादवः वृषस्कंधइवस्कंधोयस्यसतथा सप्तम्युपमानेत्यादिना
उत्तरपदलोपोबहुव्रीहिः शालोवृक्षइवप्रांशुरुन्नतः शालप्रांशुः प्रकारवृक्षयोःशालः शालःसर्जतरुरितियादवः र्जं =
महाभुजोमहाबाहुः आत्मकर्मक्षमंस्वव्यापारानुरूपंदेहंआश्रितः प्राप्तः क्षात्रः क्षत्रसंबंधीधर्म्मइवस्थितः मूर्तिमान्प
राक्रमइवस्थितः इत्युत्प्रेक्षा १३ सर्वातिरिक्तेति सर्वातिरिक्तसारेण सर्वेभ्योभूतेभ्योऽधिकबलेनसर्वाणिभू
तानितेजसाभिभवतीतिसर्वतेजोभिभावी तेनसर्वेभ्यउन्नतेनात्मनाशरीरेण आत्माजीवेधृतौदेहेस्वभावे ४
परमात्मनीतिविश्वः ॥

मेरुरिवोर्वीं क्रांत्वाऽऽक्रम्य स्थितः मेरावपि विशेषणानि तुल्यानि अत्राभिप्रायः सुरेन्द्राणां मात्राभिर्निर्मितो नृपः तस्माद
भिभवत्येव सर्वभूतानि तेजसेति मनुवचनाद्राज्ञः सर्वतेजोभिभावित्वं ज्ञेयं १४ आकारेति आकारेणाकृत्या सदृशा
प्रज्ञा यस्य सः प्रज्ञया सदृश आगमः प्रज्ञानुरूपशास्त्रपरिश्रमः आगमैः सदृशः आरंभः कर्म यस्य स तथोक्तः आरभ्यत इत्या
रंभः कर्म तत्सदृशः उदयः फलोदयः फलसिद्धिर्यस्य स तथोक्तः १५ भीमेति भीमैः कांतैश्च नृपगुणैस्तेजःप्रतापादि
भिः कुलशीलदाक्षिण्यादिभिश्च स दिलीप— संबंधिनां नेमीनां चक्रउपजीविनामाश्रितानां यादोभिर्जलग्राहैः या

आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः १३ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः सर्वोन्नते
नोर्वीं क्रान्त्वा मेरुरिवात्मना १४ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारंभः आरंभसदृ
शोदयः १५ भीमकांतैर्नृपगुणैः स बभूवोपजीविनाम् अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः १६
रेखामात्रमपि क्षुण्णादात्मनो वर्त्मनः परं न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः १७

दांसि जलजंतव इत्यमरः रत्नैश्चार्णव इवाधृष्यः अनभिभवनीयश्चाभिगम्यश्चाश्रयणीयश्च बभूव १६ रेखामा
त्रमिति नियंतुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबंधिन्यः नेमीनां चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः
चक्रधारा प्रधिर्नेमिरिति यादवः चक्रं रथांगं तस्यांतो नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः प्रजाः आत्मनोः मनुमारभ्य इ
त्यभिविधिः पदद्वयं चैतत् समासस्य विभाषितत्वात् क्षुण्णादभ्यस्तात्प्रहताच्च वर्त्मनः आचारपद्धतेः अध्वनश्च प
रमधिकमित्यर्थः रेखामात्रं रेखाप्रमाणमीषदपीत्यर्थः प्रमाणे द्वयसजित्यादिना मात्रच्प्रत्ययः परशब्दः विशेषणं चेन
न् न व्यतीयुः नातिक्रांतवत्यः कुशलसारथिप्रेषिता रथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गेण जग्मुरित्यर्थः १७ रेखा
मात्रमपि क्षुण्णादात्मनो वर्त्मनः परं न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः १७ मूलं॥

प्रजानामिति सराजाप्रजानांभूत्यर्थंवृद्ध्यर्थमेवतदर्थेनसहनित्यसमासः सर्वलिंगताचवक्तव्याग्रहणक्रियाविशेषणं
चैताभ्यःप्रजाभ्योबलिंषष्ठांशरूपंकरमग्रहीत् भागधेयःकरोबलिरित्यमरः तथाहिरविःसहस्रगुणंयस्मिन्कर्म
र.वं. णितद्यथाभवति तथासहस्रधाउत्स्रष्टुं उत्सर्जनक्रियाविशेषणंचैतत् रसंस्रष्टुमादत्तेगृह्णाति रसोगंधरसे
टी.५ स्वादेतिक्तादौविषरागयोः शृंगारादौद्रवेवीर्येदेहधात्वंबुपारदइतिविश्वः १८ संप्रतिबुद्धिशौर्यसंपन्नस्यतस्या
र्थसाधनेषुपरानपेक्षत्वमाह सेनेति तस्यराज्ञःसेनाचतुरंगबलंपरिच्छद्यतेऽनेनेतिपरिच्छदःउपकरणंबभूव
छत्रचामरादितुल्यमभूदित्यर्थः पुंसिसंज्ञायांघःप्रायेणेतिघप्रत्ययः छादेर्घेऽद्व्युपसर्गस्येतिउपधाह्रस्वः अर्थ

प्रजानामेवभूत्यर्थंसताभ्योबलिमग्रहीत् सहस्रगुणमुत्स्रष्टुमादत्तेहिरसंरविः १८ सेनापरिच्छदस्तस्यद्व
यमेवार्थसाधनम् शास्त्रेष्वकुंठिताबुद्धिर्मौर्वीधनुषिचातता १९ तस्यसंवृतमंत्रस्यगूढाकारेंगितस्यच

स्यप्रयोजनस्यसाधनेद्वयमेव शास्त्रेष्वकुंठिताःव्याहताबुद्धिःव्याहतेत्यपिपाठःधनुषिआतताआरोपितामौर्वी।
ज्याच मौर्वीज्याशिंजिनीगुणाइत्यमरः नीतिपुरःसरमेवतस्यशौर्यमभूदित्यर्थः १९ राज्यमूलंमंत्रसंरक्षणा
मर्थितस्यास्तीत्याह तस्येति संवृतमंत्रस्यगुप्तविचारस्य वेदभेदेगुप्तवादेमंत्रइत्यमरः शोकहर्षादिसूचकोमुख
कुटीमुखरागादिविकारः इंगितंचेष्टितंहृदयगतविचारोवा इंगितंहृद्गतोभावोबहिराकारआकृतिरितिसज्ज
नः गूढौआकारेंगितेयस्यस्वभावचापल्यादामपरैरयान्मुखरागादिलिंगैर्वाः तृतीयगामिमंत्रस्यतस्यप्रारभ्यंते
इतिप्रारंभाःसामाद्युपायप्रयोगाः प्रागित्यव्ययेनपूर्वजन्मोत्पन्नैःतत्रभवः प्राक्तनाःसाधुविचारेत्यादिनाट्युटु
लौप्रत्ययौ संस्कारान्पूर्वकर्मवासनाइवफलेनकार्येणानुमेयाःअनुमातुंयो ॥ श्रीरामचंद्रायनमः ॥ ५

ग्याश्रासन् अत्र याज्ञवल्क्यः मंत्रमूलं यतो राज्ञामतो मंत्रं सुरक्षितं कुर्याद्यथास्य न विदुः कर्मणामाफलोदयादिति २०
सेप्रति सामाद्युपायान्विनैव स्मरणादिकं कृतवानित्याह जुगोपेति अत्रस्तोऽभीतः सन् त्रासो यद्यप्यत्र रोगो व त्रिवर्ग
सिद्धेः प्रथमं साधनत्वाद्देवात्मानं शरीरं जुगोप रक्षितवान् अनातुरः अरुग्णेव धर्मं सुकृतं भेजे अर्जितवानित्यर्थः अ
गृध्नुः अगर्धनशीलः एवार्थमाददे स्वीकृतवान् त्रसिगृधिधृषिक्षिपेः क्नुः इति क्नुप्रत्ययः असक्तः आसक्तिरहित एवा
सुखमन्वभूत् २१ परस्परविरुद्धानामपि गुणानां तत्र साहचर्यमासीदित्याह ज्ञान इति ज्ञाने परवृत्तांतज्ञाने सत्यपि
मौनं वाङ्नियमनं यथाह कामंदकः नान्यो पतापि वचनं मौनं व्रतचरिष्णुनेति शक्तौ प्रतीकारसामर्थ्ये पि क्षमाः

फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः अगृध्नुराददे सो
र्थमसक्तः सुखमन्वभूत् २१ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः गुणा गुणानुबंधित्वात्तस्य सप्रसवा
इव २२ अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३

पकारसहनं अत्र वाणाख्यः शक्तानां भूषणं क्षमेति त्यागे वितरणे सति त्यागो विहापितं दानमुत्सर्जनविसर्जने।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनमित्यमरः श्लाघायाः विकत्थनस्य विपर्ययो भावः अत्राह मनुः न दत्त्वा प
रिकीर्तयेदिति इत्थं तस्य गुणाः ज्ञानादयः गुणैर्विरुद्धैर्मौनादिभिरनुबंधित्वात्सहप्रसवो जन्म येषां ते सप्रस
वाः सहोदरा इवाभवन् विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैव स्थिता इत्यर्थः २२ द्विविधं वृद्धत्वं ज्ञानतो वयसा च न
स्य ज्ञानेन वृद्धत्वमाह अनाकृष्टस्येति विषयैः शब्दादिभिः अनाकृष्टस्य अवशीकृतस्य विद्यानां वेदवेदांगानां पारदृ
श्वनः पारं दृष्टवतः दृशेः क्वनिप् धर्मे रतिर्यस्य तस्य राज्ञो जरसा जरया विना विस्रसा जरेत्यमरः षिद्भिदादिभ्योऽ
ङ् प्रत्ययः जराया जरसन्यतरस्यामिति जरसादेशः वृद्धत्वं वार्धकमासीत् तस्य यूनोपि विषयवैराग्यादिज्ञानगुणा
सम्पन्नाज्ञानतो वृद्धत्वमासीदित्यर्थः नाथस्तु चतुर्विधवृद्धत्वमिति कृत्वा अनाकृष्टस्येत्यादिना विशेषणत्रयेणा वैरा

प्रजानामिति प्रजायंतइतिप्रजाःजनाः उपसर्गेसंज्ञायामितिडप्रत्ययःतासांविनयस्यशिक्षायाआधानात्करणात्।
सन्मार्गवर्त्तनादितियावत् रक्षणाद्भयहेतुभ्यस्त्राणात् आपन्निवारणादितियावत् भरणादन्नपानादिभिःपोष
र॰वं॰ णादपिसमञ्चयैराजापिताभूत् तासांपितरस्तुजन्महेतवोजननमात्रकर्त्तारःकेवलमुत्पादकाएवाभूवन् जन्म
टी॰ ६ मात्रएवपितृणांव्यापारः सदाशिक्षारक्षणादिकंतुसएवकरोतीतितस्मिन्पितृत्वव्यपदेशः आहुश्च सपिताय।
स्तुपोषकइतिस्मरणात् २४ स्थित्यैइति दंडमर्हंतीतिदंड्याः दंड्यादिभ्यश्चेतियत्प्रत्ययः अदंड्यान्दंडयन्राजादं
6 ड्यांश्चैवाप्यदंडयन् अयशोमहदाप्नोतिनरकंचैवगच्छतीतिशास्त्रवचने नान्दंड्यानेवस्थित्यैलोकप्रतिष्ठायैदं

प्रजानांविनयाधानाद्रक्षणाद्भरणादपि सपितापितरस्तासांकेवलंजन्महेतवः २४ स्थित्यैदंडय
तोदंड्यान्परिणेतुःप्रसूतये अप्यर्थकामौतस्यास्तांधर्मएवमनीषिणः २५ दुदोहगांसयज्ञा
शिव यसस्यायमघवादिवम् सम्पद्विनिमयेनोभौदधतुर्भुवनद्वयम् २६

डयतःशिक्षयतःएव प्रसूतयेसंतानायैवपरिणेतुःदारान्परिगृह्णतोमनीषिणोविदुषोऽस्यार्थकामावपिधर्मएवआ
स्तांजातौ अस्तेर्लङ् अर्थकामसाधनयोर्दंडविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्मार्थत्वेनअनुष्ठाना
दर्थकामावपिधर्मविशेषतामापादयन्सराजाधर्मोत्तरोभूदित्यर्थः आहगौतमः यथाशक्तिधर्मार्थकामेभ्यः।
स्तेषुधर्मोत्तरःस्यादिति २५ दुदोहेति सराजायज्ञाययज्ञंकर्तुंगांभुवंदुदोह करग्रहणेनैवरिक्तांचकारेत्यर्थः।
मघवादेवेन्द्रःसस्यायसस्यंवर्धयितुंदिवंस्वर्गंदुदोह द्युलोकान्महतोवृष्टिमुत्पादयामासेत्यर्थः क्रियार्थोपप
देत्यादिनायज्ञसस्याभ्यांचतुर्थी एवमुभौसंपदोविनिमयेनपरस्परमादानप्रतिदानाभ्यांभुवनद्वयंदधतुःपु ६
पुषतुः राजायज्ञैरिन्द्रलोकंइन्द्रश्चोदकेनभूलोकंपुपोषेत्यर्थः उक्तंचदंडनीतौराजात्वर्थान्समाहृत्यकुर्यादिन्द्र

नकिलेति राज्ञोनेऽन्यःरक्षितुर्भयेभ्यस्त्राणकर्तुस्तस्यराज्ञोयशोनानययुःकिलनानुवक्तुः खलुकुतः यस्मात्कारणात्तस्क
रताचौर्यपरस्वेभ्यःपरधनेभ्यःस्वविषयंभूतेभ्योव्याहृत्तासतीश्रुतौवाचकशब्दे स्थितासहृत्ता अपहार्यंतराभावात्तस्करशब्द
एवापहृतइत्यर्थः अथवा अत्यंतासत्यप्यर्थेज्ञानेशब्दःकरोतीतिन्यायेनशब्देस्थितास्फुरितानस्वरूपतोऽस्तीत्यर्थः २७
द्वेष्योपीतिशिष्टोजनोद्वेष्यःशत्रुरप्यार्त्तस्यरोगिणःऔषधंयथाऔषधमिवतस्यसंमतोऽनुमतःआसीत् इष्टोजनःप्रियो
पिप्रेमास्पदीभूतोपिउरगदष्टतासर्पदष्टतांगुलिरिव छिंद्यात् बाह्यमपिदुष्टात्मनः इतिन्यायात्त्याज्यआसीत् तस्यशि
ष्टएवंदेवंदुष्टंदुष्टशत्रुरित्यर्थः २८ तस्यपरोपकारित्वमाह तमिति वेधाःस्रष्टाप्रजापतिर्वेधाइत्यमरः तंदिलीपंसमा [illegible]

नकिलानुययुस्तस्यराज्ञोरक्षितुर्यशः व्याहृत्तायत्परस्वेभ्यःश्रुतौतस्करतास्थिता २७ द्वेष्योपिसंमतःशि
ष्टस्तस्यार्त्तस्ययथौषधम् त्याज्योदुष्टःप्रियोप्यासीदंगुष्ठेवोरगक्षता २८ तंवेधाविदधेनूनंमहाभूतसमाधि
थिना तथाहिसर्वेतस्यासन्परार्थैकफलागुणाः २९ सवेलावप्रवलयांपरिखीकृतसागराम् अनन्यशासनां [illegible]

धीयतइतिसमाधिःकारणसामग्रीमहाभूतानांयःसमाधिस्तेनविदधेसर्जनूनंध्रुवमित्युत्प्रेक्षा तथाहितस्यराज्ञःसर्वेगु
णाःरूपरसादिमहाभूतगुणावदेवपरार्थपरप्रयोजनमेवैकंमुख्यंफलंयेषांतेतथोक्ताआसन् महाभूतगुणोपमानेन
कारणगुणाःकार्येसंक्रामंतीतिन्यायःसूचितः २९ सइति वेलाःसमुद्रकूलानि वेलाकूलेपिवारिधेरितिविश्वः ताएव टि॰ २
ववप्रवलयाःप्राकारवेष्टायस्याःसा स्याच्चयोवप्रमस्त्रियामित्यमरः प्राकारोवरणःशालःप्राचीनंप्रांततोवृतिरित्यमरः
परितःखाताःपरिखादुर्गवेष्टनं खातंखेयंतुपरिखेत्यमरःअन्येष्वपिदृश्यतइत्यपिडिवाः परिखांसंपद्यमानाःकृताः
परिखीकृतायस्यांसा अभूततद्भावेच्विः अविद्यमानमन्यस्यराज्ञःशासनंयस्यांसा अनन्यशासनामुर्वीमेकपुरीमि
वशशासअनायासेनशासितवानित्यर्थः ३०॥

टि॰ २

न॰ २

तस्येति तस्य राज्ञो मगधवंशे जाता मगधवंशजा सप्तम्यां जनेर्ड इति डप्रत्ययः एतेनाभिजात्यमुक्तं दाक्षिण्यं परच्छंदानु
वर्त्तनं दक्षिणाः सरलोदाराः परच्छंदानुवर्तिषु इति शाश्वतः तेन रूढं प्रसिद्धं तेन नाम्ना अध्वरस्य यज्ञस्य दक्षिणाख्याय
र॰वं॰ त्नीच सुदक्षिणा इति प्रसिद्धा पत्नी आसीत् अत्र श्रुतिः यज्ञो गंधर्वस्यासीत् सुदक्षिणा इति प्रसिद्धा पत्नी अध्वरस्य सुद्
टी॰ ७ दक्षिणा अप्सरसः इति दक्षिणाया दाक्षिण्यं नाम ऋत्विजो दक्षिणात्वं प्रापकत्वं तेन दक्षिणा इति दक्षिणा प्रतिगृह्णाति ।
श्रुतेः ३१ कलत्रवंतमिति वसुधाधिपः अवरोधे अंतःपुरे वंशे महति सत्यपि मनस्विन्या इच्छाविनयायतिचित्तानुवृत्त्या
दिनिर्बंधह्रमयेत्यर्थः तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्रवंतं भार्यावंतं मेने श्रोणिभार्ययोरित्यमरः वसुधाधि

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ३१ कलत्रवंत
मात्मानमवरोधे महत्यपि तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ३२ तस्यामात्मानुरूपायामात्म
जन्मसमुत्सुकः विलंबितफलैः कालं स निनाय मनोरथैः ३३ गंगां भगीरथेनेव पूर्वेषां पावना
क्षमाम् इच्छता संततिं तेन न्यस्तामे विभुकोशला ३४

पश्यन्नेनेन वसुधया चेति गम्यते ३२ तस्यामिति आत्मानुरूपायां तस्यां आत्मनो जन्म यस्यासौ आत्मजन्मा पुत्रः तस्मि
न्समुत्सुकः यद्वा आत्मनो जन्मनो जन्म इति पुत्रः श्रेयरोत्पन्नो समुत्सुकः सन् आत्मा वै पुत्रनामासीति श्रुतेः विलं
बितं फलं पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रो भवेदित्याशाभिः कालं निनाय यापयामास ३३ संतानेति ते
न दिलीपेन संतानमर्थः प्रयोजनं यस्य तस्मै संतानार्थाय विधये अनुष्ठानाय स्वभुजादवतारिता अवरोपिता जग
तो लोकस्य गुर्वी धूः भारः सचिवेषु निचिक्षिपे निहिता ३४ ॥

अथेति अथ पुरोवतारणानेनन्तरं पुत्रकाम्यया आत्मनः पुत्रेच्छया काम्यच्चेति पुत्रशब्दात्काम्यच् प्रत्ययः अप्रत्ययादिति पुत्र
काम्यधातोरकारप्रत्ययः ततष्टाप् तया तौ दंपती जायापती राजदंतादि पुत्रजायाशब्दस्य निपातनात्साधुः प्रयतौ भूत्वा तौ विधा
तारं ब्रह्माणं समभ्यर्च्य स खलु पुत्रार्थिभिरुपास्यत इति मांत्रिकाः गुरोः कुलगुरोर्वसिष्ठस्याश्रमं जग्मतुः पुत्रप्राप्त्युपा
यो पृच्छयेति शेषः ३५ स्निग्धेति स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तेन एकस्यन्दनेन रथेन प्रावृषि भवः प्रावृषेण्यः प्रावृष एण्य
इति एण्यप्रत्ययः तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ जग्मतुरिति पूर्वेणान्वयः इरावत्या
पः इराभूवाक्सुरापस्स्यादित्यमरः अत एव मेघारोहणं विद्युत्साहचर्यं च घटते किं च विद्युदैरावतसाहचर्यादे
वैरावती संज्ञा ऐरावतस्य स्त्री ऐरावतीति क्षीरस्वामी तस्मात्सूक्तं विद्युदैरावताविवेति एकरथारोहणान्याकार्या।

संतानार्थाय विधये स्वभुजादवतारिता तेन धूर्जगतो गुर्वी सचिवेषु निवेशिता ३५ अथाभ्यर्च्य विधातारं
प्रयतौ पुत्रकाम्यया तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ३६ स्निग्धगंभीरनिर्घोषमेकं स्यन्दनमा
स्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३७ मा भूदाश्रमपीडेति परिमेयपुरस्सरौ अनुभाववि
शेषात्तु सेनापरिगताविव ३८

सिद्धिवीजं दंपत्योरत्यंतमनस्यं सूचयति ३६ मा भूदिति पुनः कथंभूतौ दंपती आश्रमपीडा मा भूदिति मा स्त्विति हेतोः
माङि लुङीति आशीरर्थे लुङ् नमाङ्योगे इत्यडागमप्रतिषेधः परिमेयपुरःसरौ परिमितपरिचारौ अनुभाववि
शेषात्तु तेजोविशेषात्सेनापरिवृताविव स्थितौ ३८ सेव्यमान इति पुनः कथंभूतौ सुखशीतलत्वात्प्रियः संस्पर्शो ये
षां तैः सालनिर्यासगंधिभिः सर्जतरुनिस्यन्दगंधवद्भिः सालः सर्जतरुः स्मृत इति शाश्वतः उत्किरंति विक्षिपंती
ति उत्किराः तान् वनराजयस्तैः रायूतामां याढीषत्कम्पिता वनराजयो यैस्तैर्वातैः सेव्यमानौ ३९ श्रीरामचंद्राय नमः

मनोभिरामा इति रथनेमिस्वनोन्मुखैः मेघध्वनिशंकयाउन्नमितमुखैरित्यर्थः शिखण्डिभिर्मयूरैर्द्विधाभिन्नाः श्रुति।
कृतभेदेन स्वाविकृतवस्थायापगता च्युतभेदेन वा षड्जो द्विविधः तत्सादृश्यात्केकापि द्विधाभिन्नेत्युच्यते अत एवा १५
र॰वं॰ ह षड्जसंवादिनीरिति षड्भ्यः स्थानेभ्यो जातः षड्जः नासाकण्ठउरस्तालुजिह्वादन्तान् संस्पृशन् षड्जः संजायते य
टी॰ ८ स्मात्तस्मात् षड्ज इति स्मृत इति स च तन्त्रीकण्ठजन्मस्वरविशेषः निषादर्षभगान्धारषड्जमध्यमधैवताः पंचमश्चेत्य।
४ मी सप्त तन्त्रीकण्ठोत्थिताः स्वराः इत्यमरः षड्जेन संवादिनीं सदृशीं तदुक्तं मातंगेन षड्जं मयूरो वदतीति मनोभिरामाः
मनसः प्रियाः के मूर्द्धि कायति ध्वनतीति केकाः मयूराः केकावाणी मयूरस्येत्यमरः तौ केकाः शृण्वन्तौ इति श्लोकार्थः ३९

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ३९ मनोभिरामाः
शृण्वन्तौ रथनेमिस्वनोन्मुखैः षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः ४० परस्पराक्षिसादृश्यम
दूरोज्झितवर्त्मसु मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ४१ श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रज
म् सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ४२ ॥

परस्परेति विश्रम्भाददूरे समीपे यथा भवति तथा उज्झितवर्त्मसु येषु स्यन्दनाबद्धदृष्टिषु स्यन्दने रथे आबद्धा आस।
जिता दृष्टिः नेत्रं येषां तानि दिग्दृष्टिनेत्रलोचनचक्षुर्नयनानि केरणाक्षीणीति हलायुधः कौतुकवशात् रथासक्त
दृष्टिषु मृगद्वन्द्वेषु मृगाश्च यः पुमान् स्त्रिया एकशेषः तेषां मिथुनेषु द्वन्द्वेषु स्त्रीपुंसौ मिथुनं द्वन्द्वमित्यमरः परस्परा।
क्षिसादृश्यं पश्यन्तौ द्वन्द्वसामर्थ्यान्मृगीषु सुदक्षिणाक्षिसादृश्यं दिलीपाक्षिसादृश्यं मृगेष्वित्येव वियोज्यं ४१ श्रे
णीति श्रेणीबन्धात्पंक्तिबन्धनाद्धेतोः अस्तम्भां आधारस्तम्भरहितां तोरणं बहिर्द्वारं तोरणोऽस्त्री बहिर्द्वारमित्यमरः तत्र या
स्रक् तेन तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिरित्यर्थः उन्नमितत्वं जके वशाद्प्रयोगाभावेपि गम्यान्न्विहेयं कलनि ८
र्ह्रादैरव्यक्तमधुरध्वनिभिः सारसैः पक्षिविशेषैः करणैः क्वचिदुन्नमिताननौ सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय

पवनस्येति प्रार्थनासिद्धिशंसिनः अनुकूलत्वादेव मनोरथसिद्धिसूचकस्य पवनस्यानुकूलत्वात् गंतव्यदिगभिमुखत्वा
त् तुरगोत्कीर्णै रजोभिः अस्पृष्टान्यलकादेर्वेष्टनान्युष्णीषाणि च राज्ञो ययोस्तौ तथोक्तौ। शिरसो वेष्टनशोभनास्त्विति वदस्
तिच ४२ सरसीष्विति सरसीवीचिविक्षोभशीतलं ऊर्मिसंघट्टनेन शीतलं स्वनिःश्वासमनुकर्तुं शीलमस्येति स्वनिःश्वा
सानुकारिणं एतेन तयोरुत्तमस्त्रीपुंसजातीयत्वमुक्तं अरविंदानामामोदं उपजिघ्रन्तौ घ्राणेनानुभवन्तौ ४३ ग्रामेष्वि
ति आत्मविसृष्टेषु स्वदत्तेषु यूपो नाम संस्कृतः पशुबंधनाय दारुविशेषः यूपा एव चिह्नानि येषां तेषु ग्रामेषु अमोघाः सफ
लाः यज्वनां विधिनेष्टवतां यज्वा तु विधिनेष्टवानित्यमरः सुयजोर्ङ्वनिप् इति प्रत्ययः आशिषः अर्घ्यानुवादान् अर्घः पू
जाविधिः तदर्थं द्रव्यमर्घ्यं पादार्घाभ्यां चेति यत्प्रत्ययः षट्सु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणीत्यमरः अर्घ्य

पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ४२ सरसीष्वरविंदानां
वीचिविक्षोभशीतलम् आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणं ४३ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्व
नाम् अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ४४ हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेया
नि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ४५ ह १

स्यानुपदमन्वक् अर्घ्यस्वीकारानंतरमित्यर्थः गृह्णन्तौ स्वीकुर्वन्तौ पदस्य पश्चादनुपदं पश्चादर्थेऽव्ययीभावः अन्वगन्वा
क्षमनुगेऽनुपदं क्लीबमव्ययं ४४ हैयंगवीनमिति तदर्थं ह्यस्तनगोदोहोद्भवं घृतं हैयंगवीनं ह्यः पूर्वेद्युः तत्र हैयंगवी
नं स्यात् ह्योगोदोहोद्भवं घृतमित्यमरः हैयंगवीनं संज्ञायामिति निपातः सद्योघृतमादाय उपस्थितान् घोषवृद्धान् घो
ष आभीरपल्ली स्यादित्यमरः वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ नामरूपभागेभ्यो धेयः स्वार्थे इत्याचीत्यादि
नाम पृच्छतेर्द्विकर्मकं लोकेऽस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ४५
कुलकं कापीति व्रजगतौ व्रजन्तौ गच्छन्तौ शुद्धवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षिणादिलीपयोर्हेमनिर्मलयो
श्चित्राचन्द्रमसोरिव योगे सति काप्यनिर्वाच्या अभिख्या शोभा आसीत् अभिख्या नामशोभयोरित्यमरः आतश्चोपसर्गे यो

शिशिरापगमे चैत्र्यां चित्राहस्तौ चंद्रमसौ रिवेत्यर्थः ४६ तत्तदिति प्रियंसकर्मकं यस्यासौ प्रियदर्शनः योग्यदर्शनो यद्वत्यर्थः भू
मिपतिः पत्न्यै तत्तदद्भुतं वस्तु दर्शयन् लंघितमपि वाहितमध्वानं न बुबुधे न ज्ञातवान् बुधः सोमपुत्र उपमा यस्येति विग्रहः
र०वं० इदं विशेषणमानन्तदर्शनाय तिस्त्रुपमा योगितयेन्त्र स्पर्शज्ञातत्वसूचनार्थं ४७ सइति दुःप्रापयशाः दुःप्रापमन्यदुर्लभं यशो
टी०९ यस्य सः न योक्तः श्रान्तवाहनः हृतायगममात्ललान्तयुग्यः महिष्याः सखः महिषीसखः राजाहः सखिभ्यष्टजितिटच् प्रत्ययः
९ सहायान्तरनिरपेक्षत्वमिति भावः राजा सायंकाले संयमिनो नियमवतस्तस्य महर्षेर्वसिष्ठस्याश्रमं प्रापत् प्राप्तः पुषादित्वादङ्
तमाश्रमं विशिनष्टि ४८ वनान्तरादिति वनान्तरादन्यस्माद्वनान्तरादुपावृत्तैः प्रत्यागतैः समिधश्च कुशाश्च फलानि च तस्मा

काद्यैः भिन्नानयोरासीद्दुद्युतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ४६ तत्तद्भूमिपतिः पत्न्यै
दर्शयन्प्रियदर्शनः अपिलंघितमध्वानं बुबुधे न बुधोपमः ४७ स दुःप्रापयशाः प्रापदाश्रमं श्रान्तवाहनः सा
यं संयमिनस्तस्य महर्षेर्महिषीसखः ४८ वनान्तरादुपावृत्तैः समित्कुशफलाहरैः अग्निप्रत्युद्यातैः पूर्य

हर्तृशीलमेषामिति समित्कुशफलाहरास्तैः आङिताच्छील्ये हरतेराङ्पूर्वादट् प्रत्ययः अदृश्येऽदर्शनाय योग्यैः अग्नि
भिर्वैतानिकैः प्रत्युद्गतास्तैस्तपस्विभिः पूर्यमाणां प्रोष्यागच्छतामाहिताग्नीनामग्नयः प्रत्युद्यान्तीति श्रुतिः यथाह
वामं पितरं प्रोषितं वा सं पुत्राः प्रज्ञायावन्त्येवं बहवोऽग्नयः प्रज्यायावति छलदारुणीवाहरन्तीति यथैतन्तु त्रेभ्य आहवा
न्नितिना दृगितिविज्ञायते ४९ आकीर्णमिति नीवाराणां भोगाय ब्रभागधेयं अंशः रूपभागधेनामभ्यो धेयः इति वक्तव्य
त्वात् स्वार्थे धेयप्रत्ययः तस्योचितैः अतएवोटजानां पर्णशालानां द्वाररोधिभिः द्वाररोधकैर्मृगैः ऋषिपत्नीनां
अपत्यैरिवाकीर्णं व्याप्तं ५० आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५१
सेकान्तइति सेकान्ते वृक्षमूलसेचनावसाने मुनिकन्याभिः सद्यः आलवालेषु जालवालपयःपायेषु यदंबु तत्पा ९
यिनां स्यादालवालमावालमावापइत्यमरः विहंगानां पक्षिणां विश्वासाय विश्व ॥

भाय इत्येमोविश्वासविस्रंभावित्यमरः तत्क्षणोसेकक्षणोउज्झिताबालवृक्षकायस्मिंस्तत् अल्पार्थेकप्रत्ययः ५२ आतपात्य-
येति आतपात्ययेअपगमेसतिसंक्षिप्ताराशीकृताः नीवारास्तृणधान्यानियासुतासु नीवारास्तृणधान्यानीत्यमरः उटजा-
ङ्गनेषु पर्णशालानामंगणभूमिषुचत्वरभागेषु पर्णशालोटजोऽस्त्रियामित्यमरः अंगणंचत्वराजिरइतिचामरः निषादि-
भिरुपविष्टैर्मृगैर्वर्तितोरोमन्थश्चर्वितचर्वणंयस्मिंस्तत्राश्रमेतं ५३ अभ्युत्थितेति अभ्युत्थिताः प्रज्वलिताः होमयोग्या
इत्यर्थः समिद्धेग्नावाहुतीर्जुहुयादितिवचनात् तेषामग्नीनांपिशुनैः सूचकैः पवनोद्धूतैराहुतिगन्धोयेषामस्तीत्या-
हुतिगन्धिनः तैर्धूमैराश्रमोन्मुखान् अतिथीन्पुनानंपवित्रीकुर्वाणं ५४ कुलकं अथाश्रमप्राप्त्यनंतरंसराजायंतारंसा-

सेकान्तेमुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् विश्वासायविहङ्गानामालवालाम्बुपायिनाम् ५२ आतपात्ययसं-
क्षिप्तनीवारासुनिषादिभिः मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ५३ अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मु-
खान् पुनानंपवनोद्धूतैर्धूमैराहुतिगन्धिभिः ५४ अथयंतारमादिश्यधुर्य्यान्विश्रामयेतिसः तामवारोहय-
त्पत्नींरथादवततारच कुलकं

रथिमादिश्यधुरंवहन्तीतिधुर्य्याः धुरोयड्ढकावितियत्प्रत्ययः हेयंतः धुर्य्यधौरेयधुरीणाःसधुरंधराइत्यमरः।
धुर्य्यान् रथाश्वान् विश्रामयविनीतश्रमान् कुर्वित्यादिश्यतांपत्नींरथादवारोहयत् अवतारितवान् स्वयंचाव-
ततार विश्रमयन्निति ह्रस्वपाठे जनीजृषतिमित्वेमितांह्रस्वः दीर्घपाठेतुमितांह्रस्वइतिसूत्रेवाचिण्णविरागइत्यतोवे-
त्यनुवर्त्यव्यवस्थितविभाषाश्रयणाद्ध्रस्वाभावइतिवृत्तिकारः एवमन्यत्रापिज्ञेयं ५५ तस्मैसभ्येति सभायांसाधवः।
सभ्याः सभायांयइतियप्रत्ययः गुप्तमैन्द्रियाः अत्यंतनियमितेन्द्रियाः मुनयः सभार्य्यायगोप्त्रेरक्षकाय नयःशास्त्र-
मेवचक्षुस्तत्त्वावेदकंप्रमाणंयस्यतस्मैनयचक्षुषे अतएवार्हतेप्रशस्तायपूज्यायेत्यर्थः अर्हः प्रशंसायामितिशतृप्रत्य-
यः तस्मैराज्ञेऽर्हणांपूजांचक्रुः पूजानमस्यापचितिःसपर्य्यार्चार्हणाःसमाइत्यमरः ५६

विधेरिति सायंतनस्य सायंभवस्य सायंचिरमित्यादिना ट्युप्रत्ययः विधेर्जपहोमाद्यनुष्ठानस्यान्ते अरुन्धत्या अन्वासितं पश्चा
दुपवेशनेनोपवासितं कर्मणि क्तः उपसर्गवशात्सकर्मकत्वं अन्वासितेतामित्यादिवद्यद्यपि ते तपोनिधिं वशिष्ठं स्वाहया स्वा
र॰वं॰ हादेव्या अथाग्नायी स्वाहा च हुतभुक्प्रियेत्यमरः अन्वासितं हविर्भुजमिव ददर्श समित्पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपा
टी॰ १९ णिकः जपं होमं च कुर्वाणो नाभिवाद्यो द्विजो भवेदिति अनुष्ठानस्य मध्ये अभिवादननिषेधाद्विधेरन्ते ददर्शेत्युक्तं अन्वासि
10 ते चात्र पतिव्रताधर्मत्वेनोक्तं तत्तु कर्माङ्गत्वेन विधेरन्त इति कर्मणोऽस्य समाप्त्यभिधानात् कर्मण्यणः प्रत्ययः ५७ तयो
रिति मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुन्धतीवसिष्ठयोः पादान् जगृहतुः पादाग्रं प्रपदं पादः पदो

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ५६ विधेः सायंतनस्यान्ते स द
दर्श तपोनिधिम् अन्वासीनमरुन्धत्या स्वाहयेव हविर्भुजम् ५७ तयोर्जगृहतुः पादान्राजा राज्ञी च माग
धी तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिनन्दतुः ५८ आतिथेयस्तमातिथ्यविनीताध्वपरिश्रमम् पप्रच्छ कुश

ङ्घ्रिश्चरणोऽस्त्रियां तद्ग्रन्थी घुटिके गुल्फः स्त्रियां पार्ष्णिस्तयोरधः इत्यमरः पादग्रहणमभिवादने गुरुपत्नी च गुरुश्च कर्त्तारौ
सा च स च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिनन्दतुः आशीर्वादादिभिः संभावयाञ्चक्रतुरित्यर्थः ५८ आ
तिथेय इति अतिथिरतिथ्यर्थं आतिथ्यं अतिथेर्ञ इति ञप्रत्ययः आतिथ्यस्य क्रियया तया शान्तो रथक्षोभेणायः परिश्रमः स
यस्य स तं तथोक्तः यद्यपि राज्यशब्दः पुरोहितादिषु आगतत्वाद्राजकर्मवचनः तथाप्यत्र सप्ताङ्गवचनः राज्यमेवाश्र
मेषु आश्रमं मुनिं मुनितुल्यमित्यर्थः तं दिलीपं राज्ये कुशलं पप्रच्छ ते पृच्छिर्द्विकर्मकत्वमित्युक्तं यद्यपि राज्यशब्दः पुरोहि
तादिष्वागतत्वात् राजकर्मवचनः तथाप्यत्र सप्ताङ्गवचनः उपपन्नं शिवं क्षेमं स्वङ्गेष्विति उत्तरविरोधात् तथा
ह्यमरः स्वाम्यमात्यपुरं राष्ट्रं कोशदण्डौ तथा सुहृत् सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यत इति तत्र ब्राह्मणं कुश १
लं पृच्छेत् क्षत्रबन्धुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति मनुवचने सत्यपि तस्य राज्ञो महानुभावाद्ब्राह्मणो
चितः कुशलप्रश्नः एवं तत्र यत्नमस्येयेयं अत एवोक्तं राज्याश्रममुनिमिति ५९

नठ४

कुशल५

अथेति अथ प्रश्नानन्तरं विजितारिपुरः विजितः शत्रुपुरः वदतां वक्तॄणां वरः श्रेष्ठः यतश्च निर्धारणमिति षष्ठी पूः स्त्री।
पुरी नगर्यावित्यमरः अर्थपतिः राजा अथर्वणोऽथर्ववेदस्य निधेः तस्य मुनेः पुरोऽग्रे अर्थ्यामर्थादनपेतां धर्मपथ्य
र्थन्यायात् अनपेत इति यत्प्रत्ययः वाचमाददे वक्तुमुपक्रान्तवानित्यर्थः अथर्वनिधेरित्यनेन पुरोहितकृत्याभिज्ञ
त्वान्मन्त्रकार्यनिर्वाहकत्वं मुनेरस्तीत्युच्यते यथाह कामन्दकः त्रय्यां च दण्डनीत्यां च कुशलः स्यात्पुरोहितः अथर्व
विहितं कुर्यान्नित्यं शान्तिकपौष्टिकम् ६० उपपन्नमिति हे गुरो सप्तस्वङ्गेषु स्वाम्यमात्यादिषु स्वाम्यमात्यसुहृत्कोषरा
ष्ट्रदुर्गबलानि च सप्ताङ्गानीत्यमरः शिवं कुशलमुपपन्नं ननु युक्तमेव नन्ववधारणे प्रश्नावधारणानुज्ञानुनया
मन्त्रणे नन्वित्यमरः कथमित्यत आह यस्य मे दैवीनां देवेभ्य आगतानां दुर्भिक्षादीनां मानुषीणां मनुष्येभ्य आगतानां चो

अथार्थर्वविदस्तस्य विजितारिपुरः पुरः। अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ६० उपपन्नं ननु शिवं स
प्तस्वङ्गेषु यस्य मे देवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ६१ तव मन्त्रकृतो मन्त्रैर्दूरात्संशमितारिभिः प्रत्यादिश्य
न्त इव मे दृष्टलक्ष्यभिदः शराः ६२

रभयादीनां उभयत्रापि तत आगत इत्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप् आपदां व्यसनानां त्वं प्रतिहर्ता वारयि
तासि अत्राह कामन्दकः हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा इति पञ्चविधं दैवं मानुष्यं व्यसनं ततः आयु
क्तकेभ्यश्चौरेभ्यः पापेभ्यो राजवल्लभात् पृथिवीपतिलोभाच्च नराणां पञ्चधा मतम् ६१ तत्र मानुषापत्प्रतीकारमा
ह तवेति मन्त्रान्कृतवान् मन्त्रकृत् सुकर्मपापमन्त्रपुण्येषु कृञ इति क्विप् दूरात्संशमितारिभिः मन्त्रकृतो
मन्त्राणां स्रष्टुः प्रयोक्तुर्वा तव मन्त्रैः कर्तृभिः दृष्टं प्रत्यक्षं यल्लक्ष्यं तन्मात्रं भिन्दन्तीति दृष्टलक्ष्यभिदो मे शराः प्रत्यादिश्यन्त
इव वयमेव समर्थाः किमेभिः पिष्टपेषकैरिति भावः निराक्रियन्त इवेत्युत्प्रेक्षा प्रत्यादेशो निराकृतिरित्यमरः त्वन्मन्त्रसाम
र्थ्यादेव नः पौरुषं फलतीति ६२ सम्प्रति दैविकप्रतीकारमाह हविरिति हे होतः त्वया विधिवत् अग्निषु अर्जितं प्रहितमे

केकार्ते अवग्रहोवर्षप्रतिबंधः वृष्टिर्वर्षतद्विघातेविग्रहावग्रहौसमौइत्यमरः अवग्रहोवर्षप्रतिबंधइत्यत्रचप्रत्ययः तेनविशोषिणांविशुष्यतांसस्यानांवृष्टिर्भवति वृष्टिरूपेणसस्यान्युपजीवयतीतिभावः अत्रमनुः अग्नौप्रास्ताहुतिः

र॰वं॰ सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ६३ पुरुषेति आयुर्जीवितकालः आयुर्जी

टी॰ ११ वितकालइत्यमरः पुरुषस्यायुः पुरुषायुषंवर्षशतमित्यर्थः शतायुर्वैपुरुषइतिश्रुतेः अचतुरेतिसूत्रेणाऽऽयुषंतो

निपातः मदीयाःप्रजाः पुरुषायुषंजीवंतीतिपुरुषायुषइतिश्रुतेःपुरुषायुषजीविन्यःनिरातंकाःनिर्भयाः आतंको

भयमाशंकेरुजायुयःनिरीतयःअतिवृष्ट्यादिरहिताइतियत्तस्यसर्वस्यत्वद्ब्रह्मवर्चसंतवव्रताध्ययनसंपत्तिरेवहे

हविरावर्जितंहोतस्त्वयाविधिवदग्निषु वृष्टिर्भवतिसस्यानामवग्रहविशोषिणाम् ६३ पुरुषायुष

जीविन्योनिरातंकानिरीतयः यन्मदीयाःप्रजास्तस्यहेतुस्त्वद्ब्रह्मवर्चसम् ६४ त्वयैवंचिंत्यमानस्य

गुरुणाब्रह्मयोनिना सानुबंधाःकथंनस्युःसंपदोमेनिरापदः ६५ किंतुवध्वांतवैतस्यामदृष्टसदृ

शप्रजम् नमामवतिसद्वीपारत्नसूरपिमेदिनी ६६ ॥

तुः व्रताध्ययनसंपत्तिरित्यर्थःब्रह्मवर्चसमितिहलायुधः ब्रह्मणोवर्चोब्रह्मवर्चसं ब्रह्महस्तिभ्यांवर्चसइत्यच

प्रत्ययः अतिवृष्टिरनावृष्टिर्मूषकाःशलभाःशुकाः अत्यासन्नाश्चराजानःषडेताईतयःस्मृताःइतिकामंद

कः ६४ त्वयेति ब्रह्मायोनिःकारणंयस्यतेनब्रह्मपुत्रेणगुरुणात्वयेवमनेनप्रकारेणचिंत्यमानस्यानुध्याय

मानस्यातएवनिरापदोव्यसनहीनस्यमेसंपदःसानुबंधाःसानुस्यूतयःअविच्छिन्नाःइतियावत्कथंनस्युःस्यु

रेवेत्यर्थः ६५ संप्रत्यागमनप्रयोजनमाह किंत्विति किंतुतवैतस्यांवध्वांस्नुषायां वधूर्जायास्नुषाचैवेत्य

मरः अदृष्टासदृशीअनुरूपाप्रजायेनतंमांसद्वीपापिरत्नानिसूयतइतिरत्नसूरपि सत्सूद्विषेत्यादिनाक्विप्

मेदिनीनावतिनप्रीणाति अवतियातोः रक्षणगतिप्रीत्याद्यर्थेषु उपदेशादवप्रीणनेरत्नसूरपीत्यनेनसर्वरत्नेभ्यः ११

तदेवप्रतिपादयति नूनमिति मत्तःमदनंतरंयेवंश्याःतत्तस्मात् पिंडविच्छेददर्शिनः पिंडदानविच्छेदमुत्प्रेक्षमाणाः वंशेभवाः
वंश्याः वंश्याःपितरः स्वधेत्यव्ययंपितृभोज्येवर्ततेतस्याःसंग्रहेतत्पराः आसक्ताःसंतःश्राद्धेपितृकर्मणि पितृदाने
निवापःस्यात्श्राद्धंतत्कर्मशास्त्रतःइत्यमरः प्रकामभुजःपर्याप्तभोजिनोभवंति कामंपर्याप्तमित्यमरः निईनाह्या।
यातेकियदपिसंगृह्णंतीभावः ६६ मत्परमिति मत्तःपरेमदनंतरंश्राद्धादित्यादिनापंचमीदुर्लभंदुर्लभ्यंमत्वामयाआव
र्जितंदत्तंपयःपूर्वैःपितृभिःस्वनिःश्वासैःदुःखजैःकवोष्णमीषदुष्णंयथातथाउपभुज्यते भोज्यते कवोष्णमितिकुशब्द
स्यकवादेशः कोष्णंकवोष्णंमंदोष्णंकदुष्णंत्रिषुतद्वतीत्यमरः ६७ सोहमिज्येति इज्यायागः व्रजयजोर्भावेक्यप्।
इज्ययाविशुद्धात्माविशुद्धचेतनः प्रजालोपेनसंतत्यभावेननिमीलितःकृतनिमीलनःसोहंलोक्यतइतिलोकःनलो

नूनंमत्तःपरंवंश्याःपिंडविच्छेददर्शिनः नप्रकामभुजःश्राद्धेस्वधासंग्रहतत्पराः ६६ मत्परंदुर्लभं
मत्वानूनमावर्जितंमया पयःपूर्वैःस्वनिःश्वासैःकवोष्णमुपभुज्यते ६७ सोहमिज्याविशुद्धात्मा
प्रजालोपनिमीलितः प्रकाशश्चाप्रकाशश्चलोकालोकइवाचलः ६८

क्यतइत्यलोकः लोकश्चासावलोकश्चेतिवा लोकालोकश्चक्रवालाचलइव लोकालोकश्चक्रवालइत्यमरः प्रका
शतइति प्रकाशोदेवऋणाविमोचनात् नप्रकाशतइत्यप्रकाशश्चपितृऋणाविमोचनात् पचाद्यच् अस्मीतिशे
षः लोकालोकोप्यंतःसूर्यसंपर्काद्बहिस्तमोव्याप्त्याचप्रकाशश्चाप्रकाशश्चेतिमंतव्यं ६८ ननुतयोर्दानादिसंप
त्तस्यकिमन्यैरित्यतआह लोकांतरेति समुद्भवत्यस्मादितिसमुद्भवःकारणं तयोर्दानेसमुद्भवोयस्यतत्तपोदान
समुद्भवंयत्पुण्यंपरलोकांतरेपरलोकेसुखंतत्सुखकरं शुद्धवंशेभवाःशुद्धवंश्याः संततिश्चपरत्रपरलोकेशर्मणोसु
खाय शर्मशातसुखानिचेत्यमरःभवतीतिशेषः ६९ ॥

तयाहीनमिति हेविधातः स्रष्टः तयासंतत्याहीनंअनपत्यंमांस्नेहात्स्वयमेवोप्रसिक्तं जलसेचनवर्द्धितंवंध्यंअ
फलंवंध्योफलोवकेशीचेत्यमरः आश्रमेहृत्तकंद्रुत्तवन्मांपश्यन्कथमेवनदूयसेनपरितप्यसे विधातरित्यनेना
र॰ वं॰ समर्थोप्युपेक्षसइतिगम्यते ७० असह्यपीडमिति हेभगवन् अंत्यंऋणंपैत्र्यकम्ऋणंअनिर्वाणस्यमज्जनरहिता
टी॰ १२ स्य निर्वाणानिर्वृतौमोक्षेविनाशेगजमज्जनेइतियादवः दंतिनोगजस्यअरुंतुदंमर्म्मतुदतीतिअरुंतुदःमर्म्मस्पृक् व्रणो
ऽस्त्रियांमर्म्मकृत्अरुंतुदस्तुमर्म्मस्पृगित्यमरः विध्वरुषोस्तुदइतिखश्प्रत्ययः अरुर्द्विषदितिमुमागमः आला
नेगजबंधनस्तंभमिव आलानंगजबंधनमित्यमरः असह्यासोढुमशक्यापीडादुःखंयस्मिंस्तत् अवेहिदुःखजन
कंविद्धीत्यर्थः निर्वाणोऽन्याशयनानिवृत्तीगजकर्म्माणीतिपालकाव्ये ऋणंदैवस्ययागेनऋषीणांदानकर्म्मणाः

सोहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः प्रकाशश्चाप्रकाशश्च लोकालोकइवाचलः ६८ लोकांत
रसुखंपुण्यंतपोदानसमुद्भवम् संततिःशुद्धवंश्याहिपरत्रेहचशर्म्मणे ६९ तयाहीनंविधातर्म्मांकथं
पश्यन्नदूयसे सिक्तंस्वयमिवस्नेहाद्वंध्यमाश्रमपादपम् ७० असह्यपीडंभगवन्नृणमंत्यमवेहिमे
अरुंतुदमिवालानमनिर्वाणस्यदंतिनः ७१ तस्माद्यथाविमुच्येहंसंविधातुंतथार्हसि इक्ष्वाकूणां
दुरापेर्थेत्वदधीनाहिसिद्धयः ७२

संतत्यापितृलोकानांशोधयित्वापरिव्रजेत् ७१ तस्मादिति हेतात तस्मात्ऋणात्यथाहंविमुक्तोभवामि
कर्म्मणिलट् तथासंविधातुंकर्तुमर्हसि यस्मात्कारणादिक्ष्वाकूणांइक्ष्वाकुवंश्यानांनृपाणांदुष्प्रापेऽर्थेलक्ष १२
तेषांदुरापेऽर्थेसिद्धयस्त्वदधीनात्वदायत्ताःइक्ष्वाकूणामितिशेषषष्ठी नलोकेत्यादिनाकृद्योगषष्ठीनिषेधात् ७२
इतीति इतिराज्ञाज्ञापितःऋषिःध्यानेनस्तिमितेलोचनेयस्यध्यानस्तिमितलोचनःनिश्चलाक्षःसन्क्षणमात्रंसंस्थौ

सोपश्यदिति स मुनिः प्रणिधानेन चित्तैकाग्र्येण भावितात्मा शुद्धान्तःकरणः भुवो भर्तुर्नृपस्य संततेः स्तंभकारणं संतानस्तंभ-
कारणं प्रतिबंधकारणमपश्यत् अथानंतरमेनं नृपं प्रत्यबोधयत् स्वदृष्टं ज्ञापितवानित्यर्थः एवमिति गतिबुद्धीत्यादिना क-
र्तुः कर्मत्वं ७४ पुरेति पुरा पूर्वं शक्रमिन्द्रमुपस्थाय संसेव्य उर्वीं प्रति भुवमुद्दिश्य यास्यतो गमिष्यतस्तव पथि कल्पतरुच्छा-
यामाश्रिता सुरभिः कामधेनुरासीत् तत्र स्थितेत्यर्थः ७५ ततः किमित्यत आह धर्मलोपेति ऋतुः पुष्पं रज इति यावत्
ऋतुः स्त्रीकुसुमेपि चेत्यमरः ऋतुस्नाननिमित्तेन स्नातां राज्ञीं स्मृदक्षिणां धर्मऋत्वभिगमनस्य लक्षणस्य लोपाद्भ्रंशा-
त्तस्माद्भयेन त्वं संस्मरन् ध्यायन् मृदं गोदेवतं विप्रं घृतं मधु चतुष्पथम् प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीन् ॥

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ७४ सोऽपश्यत्प्रणि-
धानेन संततेः स्तंभकारणम् भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ७५ पुरा शक्रमुपस्थाय तवोर्वीं प्रति
यास्यतः आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ७६ धर्मलोपभयाद्राज्ञीमिमां संचिन्त्य सत्वरः प्र-
प्र॰ दक्षिणक्रियातीतस्तस्याः कोपमजीजनः इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः प्रदक्षिणक्रियार्हायां त-
स्यां कोपमजीजनः अवजानासि मां यस्मादतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ७७
धर्मलोपादृतुस्नातामिमां संचिन्त्य सत्वरः ×

इति शास्त्रात् प्रदक्षिणक्रियार्हायां प्रदक्षिणीकरणयोग्यायां तस्यां धेन्वां त्वं साधु प्रदक्षिणादिसत्कारं नाचरः नाचरित-
वानसीति व्यासक्तचित्तत्वाद्विस्मृतवानसीति भावः ऋतुकालाभिगमने नियमः किं ऋतुकालाभिगामी दारनिरतः सदेति अ-
करणे दोषमाह पराशरः ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति बालगोघ्नापराधेन विध्यते नात्र संशय इ-
ति ७६ अवजानासीति यस्मात्कारणात् मामवजानासि तिरस्करोषि अतः कारणात् मत्प्रसूतिं मम संततिमनाराध्या-
सेवयित्वा तेन तव प्रजा न भविष्यतीति सुरभिस्त्वां शशाप शापक्रोशे ७७ श्रुतमित्याह ईदृशार्थं मार्गमतः उद्धन्मनः दान्तः उ

सशापेति उद्दामदिग्गजे मन्नवारणे आकाशगंगायाः मंदाकिन्याः स्रोतसि प्रवाहेन रुद्धे सति हे राजन् सशापेन त्वयास्तु
नः सारथिना न च श्रुतः ७८ अस्तु प्रस्तुते किमायातमित्यत्राह ईप्सितमिति तदवज्ञानात् तस्याः धेनोरपमानात् आ
त्मनः आत्मनिष्टम् अभीप्सितं मनोरथं आप्नोतेः एनं तात् क्तः ईकारश्च सार्गलं सप्रतिबंधं विद्धि जानीहि तथाहि
र॰वं॰ पूज्यपूजाव्यतिक्रमोऽतिक्रमः श्रेयः प्रतिबध्नाति हि ७९ तर्हि गत्वा तामाराधयामि सा वा कथंचिदागमिष्यतीतिशा
टी॰१३ शानकर्त्तव्यारम्याह हविषइति सा सुरभिरिदानीं दीर्घसत्रं चिरकालसाध्यो यागविशेषो यस्य तस्य प्रचेतसो वरुणा
13 स्य हविषे दध्याज्यादिहविरर्थं भुजंगपिहितद्वारं भुजंगावरुद्धद्वारं तत एव दुःप्रवेशं पातालं अधितिष्ठति पाताले।

सशापेन त्वया राजन्न च सारथिना श्रुतः नदत्याकाशगंगायाः स्रोतस्युद्दामदिग्गजे ७८ ईप्सितं तदव
ज्ञानाद्विद्धि सार्गलमात्मनः प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ७९ हविषे दीर्घसत्रस्य सा चे
दानीं प्रचेतसः भुजंगपिहितद्वारं पातालमधितिष्ठति ८० सुतां मे कांतरं तस्याः मदीयां वत्समात
रम् आराधय सपत्नीकः सा वां कामं विधास्यति ८१ इति वादिन एवास्य होतुराहुतिसाधनम् अनिं
द्यानंदिनी नाम धेनुराववृते वनात् ८२ ताम्रा ललाटजां रेखां बिभ्रती सा सितेतरम् संध्याप्रतिपदेनेव प्रति
भिन्ना हिमांशुना ८३

तिष्ठतीत्यर्थः अधिशीङ्स्थासां कर्मेति कर्मत्वं ८० तर्हि का गतिरित्यत आह सुतामिति तस्याः सुरभेः इयं तदी
या सुता तां मदीयां वत्सं मातरं सुरभेः प्रतिनिधिं कृत्वा शुचिः शुद्धः सह पत्न्या वर्त्तत इति सपत्नीकः सन् नद्यृतश्चेति कप्प्रत्ययः
आराधय हि यस्मात् सा प्रीना तुष्टा सती कामान् दोग्धीति कामदुघा भवति दुहः कप् घश्चेति कप्र
त्ययो घादेशश्च ८१ इतीति इति वादिनो वदत एव वहोतुर्हवनशीलस्य तृन्निति तृन्प्रत्ययः तस्य मुनेः आहुतीनां साध
नकारणं नंदयतीति व्युत्पत्त्या नंदिनी नाम अनिंद्या अगर्ह्या प्रशस्ता धेनुर्वनादाववृते प्रत्यागता अव्याक्षेपो भविष्य १२
त्याः कार्यसिद्धेर्लक्षणमिति भावः संप्रति धेनुं विशिनष्टि ललाटेति पल्लववत् स्निग्धा चासौ पाटला च श्वेतरक्तरूपा

पृ॰४

ललाटे उदयो यस्य सा ललाटोदया ताम् आभुग्नं ईषद्वक्रं उदितम् श्वेतरोमाङ्कं तिलकं यस्या ताम् पाटलं चिह्नं कुटिलं भुग्नं वेल्लितं वक्रमित्यम रः श्वेतरोमाण्येवाङ्कं तं बिभ्रती नवं शशिनं बिभ्रती सन्ध्येव स्थिता ८३ भुवमिति कोष्णेन किञ्चिदुष्णेन कवोष्णमिति च कारात्कादेशः अवभृथादपि स्नानादपि मेध्येन पवित्रेण आहुतं पवित्रं मेध्यं चेत्यमरः वत्सस्यालोकोदर्शने प्रवर्त्तिना प्रवह नात्प्रस्रवेणाक्षीराभिस्यन्देन भुवमभिवर्षन्ती सिञ्चन्ती कुण्डमिव ऊधः आपीनं यस्याः सा कुण्डोध्नी ऊधस्तु क्लीबमापीनमि त्यमरः अत्र ऊधसो नङ् इति समासान्तो देशः बहुव्रीहेरूधसो ङीषिति ङीप् ८४ रजइति खुरोद्धूतैरन्तिकात्समीपेगा त्रं स्पृशद्भिः दूरान्तिकार्थेभ्यो द्वितीया चेति चकारात्पञ्चमी रजसां कणैः महीक्षयते इष्टे इति महीक्षित् क्विप् तस्य तीर्थाभिषेके राज्ञा
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला । बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ॥ ८३ ॥ भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि । प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्त्तिना ॥ ८४ ॥ रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् । तीर्थाभिषेकजां शुद्धिमादधाना महीपतेः ॥ ८५ ॥ कुलकं तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्त पोनिधिः । याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ॥ अदूरवर्त्तिनीं सिद्धिं राजन्विगणयात्मनः । उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ॥ ८७ ॥

तीर्थाभिषेके राज्ञा जाते तीर्थाभिषेकजां शुद्धिमादधाना कुर्वाणा एतेन वायव्यं स्नानमुक्तं उक्तं च मनुना आग्नेयं भस्मना स्नानमवगाह्यं तु वारुणम् आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतमिति ८५ गवान्तरणप्रकारमाह तामि ति निमित्तज्ञस्तपोनिधिर्वसिष्ठः पुण्यदर्शनं यस्यास्तां धेनुं दृष्ट्वा आशंसिते मनोरथे न पुंसकामाविक्तः तत्रावन्ध्यं स फलं प्रार्थनं यस्य तमवन्ध्यमनोरथमित्यर्थः याजयितेयो ग्यं याज्यं पार्थिवं पुनरब्रवीत् ८६ अदूरेति हे राजन्नात्मनः कार्यस्य सिद्धिम् अदूरवर्त्तिनीं शीघ्रभाविनीं विगणय विद्धि यद्यतः कारणात् कल्याणी मङ्गलमूर्त्तिः बाह्वादिभ्य श्चेति ङीष् इयं धेनुर्नाम्नि कीर्त्तित एव उपस्थिता ८७ वन्येति वने भवं वन्यं कन्दमूलफलादिकं वृत्तिराहारो यस्य स

यास्त्वत्तदा आसादादविच्छेदेनेत्यर्थः आत्मनस्तव कर्तृत्वेनानुगमनेनानामाद्रिरोनाभ्यसनेनाभ्यासेनानुष्ठानेनाभ्यासेन विद्या
मिव प्रसादयितुं प्रसन्नां कर्तुमर्हसि ८८ गवामनुसरणप्रकारमाह प्रेति प्रस्थितायां आचलितायां प्रतिष्ठेथां प्रयाहि
समेव प्रविस्थाः स्थाइत्यात्मनेपदं स्थितायां निवृत्तिगतिकायां स्थितिमाचरः स्थितिं कुरु तिष्ठेत्यर्थः निषण्णायामुपवि
ष्टायां निषीद उपविश विध्यर्थे लोट् पीतमंभो यया तस्यां पीतांभसि सत्यां अपः पिबेः ८९ वधूरिति वधूर्जाया भ
क्तिमती गंधादिभिरर्चितां इमेनां गां प्रातस्तपोवनात् अन्वियात् अनुगच्छेत् आङ् मर्यादायां पदद्वयमेतत् सायमपि
प्रत्युद्व्रजेत् प्रत्युद्गच्छेत् विध्यर्थे लिङ् ९० इतीति इत्यनेन प्रकारेण त्वमाप्रसादात् प्रसादपर्यंतं आङ् मर्यादा

वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम्। विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ८८ प्रस्थितायां प्रति
ष्ठेथाः स्थितायां स्थानमाचरेः। निषण्णायां निषीदास्यां पीतांभसि पिबेरपः ८९ वधूर्भक्तिमती चैनामर्चि
तामा तपोवनात्। प्रयाता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ९० इत्या प्रसादादस्यास्त्वं परिचर्यापरो भ
व। अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणां ९१ तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः। आदेशं देश
कालज्ञः शिष्यः शासितुरानतः ९२

भिविध्योरित्यस्यैवैभाषिकत्वात् अनुसमासत्वं अस्याधेनोः परिचर्यापरः शुश्रूषापरो भव तव विघ्नाभावोस्तु अ
व्ययं विभक्त्यादिनार्थाभावेऽव्ययीभावः पितेव धुरि पुत्रिणां सत्पुत्राणां सत्पुत्रवतां प्रशंसायामिति णिनिः प्रत्य
यः धुर्यग्रे स्थेयाः तिष्ठेत्याशीरर्थे लिङ् एलिङीत्याकारस्यैकारादेशः त्वत्सदृशो भव पुत्रोस्त्विति भावः ९१ तथे
ति देशकालज्ञो देशोऽग्निसन्निधिः कालोऽग्निहोत्रावसानसमयः विशिष्टदेशकालोत्पन्नं आकर्षज्ञानमव्या
हृतिरिति जानन् अत एव प्रीतिमान् शिष्यो अंतेवासी सन् छात्रांतेवासिनो शिष्ये इत्यमरः सदाराः सपत्नीकः पत्नी
परिजनादानमूलशापाः परिग्रहा इत्यमरः आनतो विनययुक्तः नम्र इत्यर्थः शासितुरादेशिनः गुरोरादेशमाज्ञां तथे

अथेति अथ प्रदोषे रात्रौ दोषज्ञो विद्वान् विद्वान्विपश्चिद्दोषज्ञ इत्यमरः सूनृतवाक् प्रियं सत्यं च सूनृतमिति हला
युधः स्रष्टुः सूनुः ब्रह्मपुत्रो मुनिः अनेन प्रकृतकार्यनिर्वाहकत्वं सूचयति ऊर्जितश्रियं विशांपतिं मनुजेश्वरं द्वौ
विशौ वैश्यमनुजावित्यमरः संवेशाय निद्रायै स्वापाय विधयार्जित स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यमरः विस
सर्ज आज्ञापयामास ९३ सत्यामिति कल्पवित् व्रतप्रयोगाभिज्ञो मुनिः वशि तपःसिद्धौ सत्यामपि वनयसे व राज
योग्याहारसंपादनसामर्थ्ये सत्यपीत्यर्थः नियमापेक्षया तदा प्रभृत्येव व्रतचर्यापेक्षयैव अस्य राज्ञो वन्यामेव संविधी
यतेऽनयेति संविधां कुशादिशयनसामग्रीं आतश्चोपसर्ग इति कप्रत्ययः अकर्तरि च कारके संज्ञायामिति क।

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्। सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम्। ९३ स
त्यामपि तपःसिद्धौ नियमापेक्षया मुनिः। कल्पवित्कल्पयामास वन्यामेवास्य संविधाम्। ९४ निर्दिष्टां
कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः। तच्छिष्याध्ययननिवेदितावसानां संवि
ष्टः कुशशयने निशां निनाय। ९५ ॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ वसिष्ठाश्रमगमनो नाम गमनो ५
प्रथमः सर्गः १ ॥

र्माय संविधां कल्पयामास संपादयामास ९४ निर्दिष्टामिति स राजा कुलपतिना मुनिकुलेश्वरेण वसिष्ठेन निर्दिष्टां प
र्णशालामध्यास्याधिष्ठाय तस्यामधिष्ठानं कृत्वेत्यर्थः अधिशीङ्स्थासां इत्यादिनाधारस्य कर्मत्वं कर्मणि द्वितीया प्र
यतो नियतः पत्नी द्वितीया यस्येति स तथोक्तः कुशानां शयने संविष्टः सुप्तः सन् तस्य वसिष्ठस्य शिष्याणामध्ययनेन
अपररात्रे वेदपाठेन निवेदितमवसानं यस्यास्तां निशां निनाय निर्गमयामास अपररात्रे ध्ययने मनुः निशान्ते न परि

त्यपुनःस्वपेत् नचापररात्रमधीत्यपुनःस्वपेदिति गौतमस्मरणात् प्रहर्षिणीवृत्तमेतानततः तदुक्तं म्नौज्रौगस्त्रिदशयति
प्रहर्षिणीयमिति ९५ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांरघुवंशटीकायांसंजीवनी-

र॰वं॰ समाख्यायांप्रथमःसर्गः १ आशासुराशीभवदंगवल्लीभासैवदासीकृतदुग्धसिंधुम् मंदस्मितैर्निंदितशारदें-
टी॰१५ दुंवंदेरविंदासनसुंदरीत्वाम् १ अथेति अथनिशानयनानंतरं यशोधनः प्रजानामधिपः प्रजेश्वरः प्रभाते
15 प्रातःकाले जाययासुदक्षिणायाप्रतिग्राहयित्वा प्रतिग्राहितेस्वीकारितेगंधमाल्येययासातथोक्तातांपीतंपान
मस्तीतिपीतःपीतवानित्यर्थः अर्शआदिभ्योऽजित्यच्प्रत्ययः पीतागावोभुक्ताब्राह्मणाइतिमहाभाष्यदर्शनात् ।

अथप्रजानामधिपःप्रभातेजायाप्रतिग्राहितगंधमाल्यां वनायपीतप्रतिबद्धवत्सांयशोधनोधेनुमृषेर्मुमोच १

पीतःप्रतिबद्धःवत्सोयस्यास्तांसो ऋषेर्धेनुंवनेगंतुंमुमोच क्रियार्थोपपदेत्यादिनाचतुर्थीजायापदसामर्थ्यात् ।
सुदक्षिणायाःपुत्रजननयोग्यत्वमनुसंधेयं तथाहिश्रुतिः जायायांप्रविशतिगर्भोभूत्वासमातरम् तस्यांपुनर्नवो
भूत्वादशमेमासिजायते तज्जायाभवतियदस्यांजायतेपुनरिति यशोधनइत्यनेनपुत्रवत्ताकीर्त्तिलाभात् राजा
गर्ह्यगोरक्षणेप्रवृत्तइतिगम्यते अस्मिन्सर्गेवृत्तमुपजातिः अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातय
स्ताइति १ पांशवोदोषाआसांसंतीति पांसुलाःस्वैरिण्यः स्वैरिणीपांसुलाचस्यादित्यमरः सिध्मादिभ्यश्चेतिल
पतिव्र॰ताना च्प्रत्ययः अपांसुलानांधुरिश्रेष्ठे कीर्तनीयापरिगणनीया मनुवंश्यस्येश्वरस्यधर्मपत्नी खुरन्यासैःपादप्रक्षेपैः १५
पवित्राःपांसवोयस्यतैरेराज्ञश्चयोषितां ॥

धूलिः पांशुर्नानद्वयोरजइत्यमरः अत्रस्मृतिः अपांशुरेतामितिस्मृतिः येवेदार्मार्गस्मृतिर्मन्वादिवाक्यं श्रुतेर्वेदवाक्यस्या
र्थमभिधेयमिवान्वगच्छत् अनुसृतवती यथास्मृतिः श्रुतिः स्वस्यैवार्थमनुसरति तथासापि गोःखुरस्यैवमा
र्गमनुससारेत्यर्थः धर्मपत्नीत्यत्र प्रथमादिवत्तादर्थ्ये षष्ठीसमासः प्रकृतिविकारभावाभावाभ्यांपांशुभयचहत्वावपि
चपांसुलानामितिविरोधालंकारो ध्वन्यते २ निवर्त्येति दयालुः कारुणिकः स्याद्दयालुः कारुणिक इत्यमरः स्पृ
हीत्यादिना आलुच प्रत्ययः यशोभिः सुरभिर्मनोज्ञः सुरभिः स्यान्मनोज्ञेपीति विश्वः स राजा दयितां निवर्त्य तां धेनुं
कामधेनुसुतां नंदिनीं धरतीति धराः पचाद्यच् पयसोधराः पयोधराः स्त्रीस्तनाब्दौ पयोधरावित्यमरः अपयो ।

तस्याः खुरन्यासपवित्रपांशुमपांसुलानां धुरिकीर्तनीया मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृ
तिरन्वगच्छत् २ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः पयोधरीभूतचतुःस
मुद्रां जुगोप गोरूपधरामिवोर्वीम् ३ ॥

धराः पयोधराः संपद्यमानाः पयोधरीभूताः अभूततद्भावे च्विः कुगतिप्रादय इति समासः पयोधरीभूताश्चत्वारः
समुद्रा यस्यास्तां अनेकमन्यपदार्थे इति अनेकपदार्थग्रहणसामर्थ्यात्त्रिपदोपि बहुव्रीहिः गोरूपधरामुर्वीमि
व गुणोपरक्षा भूतलरक्षणप्रयत्नेनैव ररक्षेति भावः ३ व्रतायेति व्रताय धेनोरनुचरणेन तज्जीवनाय
वः तेन दिलीपेन शेषोपि अवशिष्टोपि अनुयायिवर्गोनुचरवर्गो न्यषेधि निवर्तितः शेषत्वे तु दक्षिणायेन्नायाक
ष्टेनस्यात्मरक्षणमत आह नचेति तस्य दिलीपस्य शरीररक्षाच अन्यतः पुरुषान्तरान्न कृता हि यस्मात्कारणान्म
नोः प्रसूतिः संततिः स्ववीर्यगुप्ता स्ववीर्येणैव रक्षिता नहि सनिर्वाहकस्य परापेक्षेति भावः ४

आस्वाडवद्भिरिति सम्राड्मंडलेश्वरः येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः स सम्राड्थ राजक
मित्यमरः सराजा आस्वाडवद्भिः रसवद्भिः आस्वादयुक्तैरित्यर्थः तृणानां कवलैर्ग्रासैः कंडूयनैः खर्जनैः दंशानां
र·वं· मक्षिकाणां निवारणैश्च दंशस्तु वनमक्षिकेत्यमरः अव्याहतैः प्रतिहतैः स्वैरगतैः स्वच्छंदगमनैः तस्या धेन्वाः समारा
टी·१६ धनेतत्परः शुश्रूषायुक्तोऽभूत् तदेव परं प्रधानं यस्मिन्निति तत्परः तत्परे प्रसितासक्ताविष्टमरः ५ स्थित इति भूपतिस्तां
16 गां स्थितां सतीं स्थितः सन् स्थितिरूर्ध्वावस्थाने प्रयातां प्रस्थितां निषेदुषीं निषण्णामुपविष्टामित्यर्थः आसायां सदवस्

व्रतायतेनानुचरेण धेनोर्न्यषेधिशेषोऽप्यनुयायिवर्गः नचान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः
प्रसूतिः ४ आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च अव्याहतैः स्वैरगतैः स तस्याः स
म्राड् समाराधनतत्परोऽभूत् ५ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः जलाभि
लाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ६ स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानु
मितां दधानः आसीदनाविष्कृतदानराजिरंतर्मदावस्थ इव द्विपेन्द्रः ७

इति क्वसुप्रत्ययः उगितश्चेति ङीप् आसनबंधे उपवेशने धीरः स्थितः सन्नित्यर्थः जलं आददानां पिबंतीमनुलु
द्दीकृत्य जलाभिलाषी पिबन्नित्यर्थः इत्थं छायेवान्वगच्छत् अनुसृतवान् ६ सन्यस्तेति सन्यस्तानि हृतानि
परिहृतानि चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतामपि तेजोविशेषेण प्रभावातिशयेनानुमितां सर्वथा रा
वे जाध्वायं भूदिति स्फुरितां राजलक्ष्मीं दधानः स राजा अनाविष्कृतदानराजिः अप्रकटितमदलेखः अंतर्गता मा १६
दावस्था यस्य तथाभूतो द्विपेंद्र इवासीत् ७॥

लतांतोवल्लीतोप्रतानेः कुटिलतंतुभिः उन्मथ्यग्रथिता ये केशास्तैरुपलक्षितः इत्यंभूतलक्षणेतृतीयास्तदाज्याश्रा
धिज्यमारोपितमौर्वीकं धनुर्यस्य सोधिज्यधन्वासन् धनुषश्चेत्यनङादेशः मुनिहोमधेनोः रक्षापदेशात् रक्षा
व्याजाद्धन्यान्वनेभवान्दुष्टसत्वान् दुष्टजंतून् द्वयाः स्वव्यवसायेषु सत्वमस्त्री तु जंतुष्वित्यमरः विनेष्यन् शिक्ष
यन्निवदावं वनेविचचार वनेचवनवह्नौ च दवो दाव इत्युभयत्रेति यादवः वनेचचारेत्यर्थः देशकालाध्वगंतव्याः
कर्मसंज्ञाह्यकर्मणाः ८ विसृष्टेत्यादिश्लोके : षड्भिः तस्य महामहिमतया द्रुमादयोपि राजोपकारं चक्रुः विसृ
ष्टेति विसृष्टाः त्यक्ताः पार्श्वानुचरस्य पार्श्ववर्तिनो जनायेन तस्य पाशभृता वरुणोन समस्य तुल्यस्य अनेनानुभावः

लताप्रतानोद्ग्रथितैः सकेशैरधिज्यधन्वाविचचारदावम् रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्नि
वदुष्टसत्वान् ८ विसृष्टपार्श्वानुचरस्यतस्य पार्श्वद्रुमाः पाशभृतासमस्य उदीरयामासुरिवोन्मदा
नामालोकशब्दं वयसां विरावैः ९ मरुत्प्रयुक्ताश्चमरुत्सखाभं तमर्च्यमारादभिवर्तमानं आवाकि
रन्वाललताः प्रसूनैराचारलाजैरिवपौरकन्याः १०

सूचितं तस्य राज्ञः पार्श्वयोर्द्रुमाः उन्मदानां उत्कटमदानां वयसां खगानां खगबाल्यादिनोर्वयस्त्यमरः विरावैः शब्दै
रालोकशब्दं जयशब्दं आलोको जयशब्दः स्यादिति विश्वः आलोकस्य शब्दं वाचकं आलोकयेति शब्दमित्यर्थः उदीरया
मासुरिव अवदन्निवेत्युत्प्रेक्षा ९ मरुत्प्रयुक्ताइति मरुत्प्रयुक्ता वायुनाप्रेरिता वाललताः आरात्समीपे अभिवर्तमानं आ

रोहरसमीपयोरित्यमरः मरुतः वायोः सखा मरुत्सखः अग्निः तस्य इवाभाती ति मरुत्सखाभः आतश्चोपसर्गे इति कप्रा
त्ययः अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः पौरकन्याः पौराश्च ताः कन्याश्च आचारार्थं लाजैराचारलाजैरि वाकिरन्
तस्योपरि चिक्षिपुरित्यर्थः सखायमागतमुपचरन्तीतिभावः १ धनुर्भृत इति धनुर्भृतोप्यस्य राज्ञः पनेन

दययाकृपयारसेनार्द्रीभावोऽभिप्रायोयस्यतद्दयार्द्रभावंतदाख्यातेदयार्द्रभावादेतदित्याख्यातमित्यर्थः भावः स
त्तास्वभिप्रायचेष्टात्मजन्मस्वित्यमरः तथाविधंवपुर्विलोकयंत्योहरिण्यःअक्ष्णांप्रकामविस्तारस्य तेनविशा
लतायाः फलमापुः विमलंकलुषीभवच्चेतः कथयत्येवहितैषिणंरिपुंचेतिन्यायेनस्वांतःकरणप्रसादे
 वविश्वासंददृशुरित्यर्थः ११ सकीचकैरिति मारुतपूर्णरंध्रैः अतएवकूजद्भिः कीचकैर्वेणुविशेषैः वेणा
वःकीचकास्तेस्युर्येस्वनंत्यनिलोद्धताइत्यमरः वंशःसुषिरवाद्यविशेषः वंशादिकंतुसुषिरमित्यमरः उच्चैर्वा
17 यादिनेवंशस्यकृत्यंकार्यंयस्मिन्कर्मणितत्तथा कुंजेषुलतागृहेषु निकुंजकुंजौवाक्लीवेलतादिपिहितोदर

धनुर्भृतोप्यस्यदयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः विलोकयंत्योवपुरापुरक्ष्णांप्रकामविस्ता
रफलंहरिण्यः ११ सकीचकैर्मारुतपूर्णरंध्रैःकूजद्भिरापादितवंशकृत्यम् शुश्रावकुंजेषुयशः
स्वमुच्चैरुद्गीयमानंवनदेवताभिः १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी
तमातपक्लांतमनातपत्रमाचारपूतंपवनःसिषेवे १३

इत्यमरः वनदेवताभिरुद्गीयमानंस्वंयशः शुश्रावश्रुतवान् १२ पृक्तइति गिरिषुनिर्झराणांप्रवाहाणां प्रवाहो
निर्झरोझरइत्यमरः तुषारैर्हिमशीकरैः तुषारोहिमशीकरइतिशाश्वतः पृक्तःसंपृक्तः अनोकहानांवृक्षाणामा
कंपितानिईषत्कंपितानिपुष्पाणितेषांयोगंधः सोस्यास्तीतितथोक्तः पुष्पगंधीईषत्कंपितपुष्पगंधवान् एवं
शीतोमंदःसुरभिःपवनोवायुः अनातपत्रंव्रतार्थंपरिहृतच्छत्रंअतएवातपक्लांतंसूर्यातपक्लिष्टंआचारे
णपूतंशुद्धंतंनृपंसिषेवे आचारपूतत्वात्सराजाजगत्पावनस्यपवनस्यापिसेव्यआसीदितिभावः १३ शा
शामेति गोप्तरितस्मिन्राज्ञिवनंगाहमानेप्रविशतिवृष्ट्यापिविनादवाग्निः वनाग्निः दवोदावोवनानले ॥

वनेइति हेमः शशाम फलानां पुष्पाणां वृद्धिः विशिष्यइति विशेषात्प्रतिशयितः इति अपासीत् कर्मार्थे घञ् प्रत्ययः स
त्वेषु जंतुषु मध्ये यतस्त्वनिर्द्धारणमिति सप्तमी अधिकः प्रबलो व्याप्तः वृद्धिः ऊनेद्र्वले हरिणादिकेन ववाधे १४
संचारितिपल्लवस्य रागो वर्णः पल्लवरागः रागोनरक्ते मात्सर्य्ये क्लेशादौ लोहितादौ चितिशाश्वतः सएव ताम्रः पल्लव
रागताम्रा पतंगस्य सूर्यस्य प्रभा कांतिः पतंगः पक्षिसूर्ययोरिति शाश्वतः मुनेर्येन्ने च दिगंतराणि दिशावकाशान्
अंतरमवकाशावधीत्यमरः संचारेणाग्नुद्वानिष्पन्नानि कृत्वा दिनांते सायंकाले निलयाय अस्तमयाय येनयद्दत्रा
श्रमाय गंतुं प्रचक्रमे १५ तामिति मध्यमलोकपालो भूपालः देवतापितृअतिथीनां क्रियायागश्राद्धदानानिता

शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषात्फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको ववाधे तस्मिन्वनं गो
प्तरिगाहमाने संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लवरागताम्रा प्र
भा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः वभौ च सा
तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६

प

न्वेवार्थः प्रयोजनं यस्याः स्तां धेनुं अन्वक् अनुपदं ययौ अन्वगन्वक्षमनुगोनुपदं क्लीवमव्ययमित्यमरः सतां
मतेन सद्भिर्मान्येन मतिबुद्धीत्यादिना वर्तमाने क्तः क्तस्य च वर्तमाने इति षष्ठी तेन राज्ञा उपपन्ना युक्ता साधेनुः सा-
तां मतेन विधिना अनुष्ठानेन उपपन्ना युक्ता साक्षात्प्रत्यक्षा श्रद्धा आस्तिक्यबुद्धिरिव वभौ च १६ सइति सराजा
पल्वलेभ्यः अल्पजलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहाणां यूथानि कुलानि येषु तानि वर्हीणां येषां संतीति वर्हि
णः मयूराः मयूरो वर्हिणो वर्ही नीलकंठो भुजंगभुगित्यमरः फलवद्भ्यां मनिचद्रवक्षत्यः आवासवृक्षाणां उन्मु

नानि वराहवर्हिणोदिश्येषोर्मलिम्नः मलिनीभवंतिश्यामायमानानि लोहितादिभ्यः क्यष्विति क्यष्प्रत्ययः वाक्य
षश्त्यात्मने पदेशानच् मृगैरध्यासितानध्यिष्ठितानाशाद्वलायेषुतानि शादाःशष्पाणि येषांसंतीतिशाद्वलाःश
र.वं. ष्पश्यामादिशाःशाद्वलःशादहरितेशत्यमरःशादःकर्दंवशष्पयोरितिविश्वः नडशादाड्वलज्जितिवलच् प्रत्ययः
टी. १८ वनानिपश्यन्ययौ १७ आपीनेति दृष्टिःसकृत्प्रसूतागौः दृष्टिःसकृत्प्रसूतागौरितिहलायुधः नरेन्द्रस्यानुव
18 भीयथाक्रमे आपीनम्नूधः ऊधस्तुक्लीवमापीनमित्यमरः आपीनभारोद्वहनेप्रयत्नात् प्रयासात् वपुषोगुरुत्वा
दधिक्याच्चोचिताभ्यांचारुभ्यांगताभ्यांगमनाभ्यांतपोवनादावृत्तेः पंथानंतपोवनावृत्तिपथं ऋक्पूरित्यादिना

सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखवर्हिणानि ययौमृगाध्यासितशाद्वलानिश्यामायमा
नानिवनानिपश्यन् १७ आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेन्द्रः उभावलंचक्रतुरं
चिताभ्यांतपोवनावृत्तिपथंगताभ्यां १८ वसिष्ठधेनोरनुयायिनंतमावर्तमानंवनितावनांतात्
पपौनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्याम् १९

कारःप्रत्ययःसमासांतः अलंचक्रतुर्भूषितवंतौ १८ वसिष्ठेति वसिष्ठधेनोरनुयायिनमनुचरं वनांतादावर्त
मानंप्रत्यागतंदिलीपं वनितासुदक्षिणानिमेषेणालसामंदापक्ष्मणांपंक्तिर्यस्याःसात्रनिमेषासतीत्यर्थः
२४ लोचनाभ्यांकरणाभ्यामुपोषिताभ्यामिवउपवासोभोजननिवृत्तिःतद्वद्भ्यामिव वसतेःकर्तरिक्तःपपौयथोप
पोषितोतितृष्णयाजलमधिकंपिवति तद्वदतितृष्णयाधिकंव्यलोकयदित्यर्थः १९ पुरस्कृतेति वर्त्मनि
मार्गे पार्थिवेनदृथिव्याईश्वरेण तस्यैश्वरश्त्यणप्रत्ययः पुरस्कृताग्रतःकृताधर्मस्यपत्नीधर्मपत्नीधर्मा १८

श्चघासादिवितादर्थ्ये षष्ठीसमासः पार्थिवस्य धर्मपत्न्या प्रत्युद्गता अभिमुखीकृता साधेनुस्तदंतरे तयोर्दंपत्योर्मध्ये दिनक्षपयोर्दिनरात्र्योर्मध्यगता संध्येव रराज २० प्रदक्षिणीकृत्येति अक्षतानां पात्रेण सह वर्तत इति साक्षतपात्रो हस्तो यस्याः सुदक्षिणा पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य च अस्या धेन्वाः विशालं शृंगांतरं शृंगमध्यं अर्थसिद्धेः कार्यसिद्धेः द्वारमिव प्रवेशमार्गमिवानर्च अर्चयामास अर्चयतेर्भौवादिकाल्लिट् २१ वत्सोत्सुकेति साधेनुर्वत्सोत्सुकापि वत्स उत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्यग्रहीत् इति हेतोस्तौ दंपती ननंदतुः

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः २१ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् २३

पूजास्वीकारस्यानंदहेतुतामाह भक्त्येति पूज्येष्वनुरागो भक्तिः तयोपपन्नेषु युक्तेषु विषये तद्विधानां तस्या धेन्वा विधेव विधा प्रकारो येषां महतामित्यर्थः प्रसादस्य चिह्नानि लिंगानि पूजास्वीकारादीनि पुरःफलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि अविलंबितफलसूचकलिंगदर्शनादानंदो युज्यत इत्यर्थः २२ गुरोरिति भुजोच्छिन्नरिपुर्दिलीपः सदारस्य दारैररुंधत्या सह वर्तमानस्य गुरोरुभयोरपीत्यर्थः पादौ निपीड्य अभिवंद्य सांध्यं संध्यायां विहितं विधिमनुष्ठानं च समाप्य दोहावसाने निषण्णामासीनां दोग्ध्रीमेव दोहनशीलामेव नंदिनीं तृन्प्रत्ययः पुनर्भेजे सेवितवान् दोग्ध्रीमिति तृन्नंतपदप्रयोगात्कामधेनुत्वं गम्यते २३ तामिति

अ्रतिकेन्यस्तावलयः प्रदीपास्थयस्यास्तां तथोक्तां निषण्णां येनेनं येन्वास्यानुपविश्य क्रमेण सुप्तां तामनु अनन्तरं संवि-
प॰ वेश सुप्तोत्थितां प्रातः सुप्तोत्थितामनूदतिष्ठत् उत्थितवान् अत्रानुशब्देन येन राजव्यापारस्य मध्ये योवीयस्थिमनुच्य-
र॰ वं॰ ते क्रमशब्देन येन व्यापाराणामित्यर्थो न कृतं कर्मप्रवचनीययुक्ते द्वितीया २४ इत्थमिति इत्थमनेन प्र-
टी॰ १९ कारेण प्रजार्थं समानां न्यायं महिष्या समं अभिषिक्तपत्न्या सह कृताभिषेका महिषीत्यमरः व्रतं धारयतः महनी-
यापूजार्हा कीर्तिर्यस्य दीनानामुद्धरणे दीनविमोचने उचितस्य तस्य नृपस्य त्रयो गुणाः आवर्त्तयो येषां तानि त्रिगु-
णानि त्रिरावृत्तानि सप्त दिनानि एकविंशति दिनानि व्यतीयुः २५ अन्येद्युरिति अन्येद्युः अन्यस्मिन् दिने द्वाविंशे

नामन्तिकन्यस्तवलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रा-
तरनूदतिष्ठत् २४ इत्थं व्रतं पालयतः प्रजार्थं समं महिष्या महनीयकीर्तेः सप्त व्यतीयुस्त्रिगुणा-
नि तस्य दिनानि दीनोद्धरणोचितस्य २५ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधे-
नुः गंगाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश २६ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशो-
भाप्रहितेक्षणेन अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष २७

दिने सद्यःपरुत्परार्यैषमाद्यादिनिपातनादव्ययम् अत्राह्यायाद्यपूर्वेद्युरित्यादौ एवं नव पदानि तथा धारान्यान्यतरेत-
रान्येद्युः परारादयः इत्यमरः मुनिहोमधेनोरात्मानुचरस्य नृपस्य भावमभिप्रायं हृद्भक्तित्वं भावोऽभिप्रायः आ-
प्रायः इति यादवः जिज्ञासमाना ज्ञातुमिच्छतीति ज्ञा सनू इत्यात्मनेपदे शानच् प्रपतन्त्यस्मिन्निति
प्रपातः पतनप्रदेशः गंगायाः प्रपातं तस्यान्ते समीपे निरूढानि जातानि शष्पाणि बालतृणानि यस्मिंस्तत् शष्पं
बालतृणं घासः इत्यमरः गौरीगुरोः पार्वतीपितुर्गह्वरं गुहामाविवेश २६ सेति सा धेनुर्हिंस्रैर्व्याघ्रादिभिर्मन-
सापि दुःप्रधर्षा दुर्द्धर्षेति हेतोरद्रिशोभायां प्रहितेक्षणेन दत्तदृष्टिना नृपेणालक्षितमभ्युत्पतनमाभिमुख्येनो- १९

नास२

तदीयमिति गुहानिबद्धेन प्रतिध्वनिना दीर्घं तस्या इदं तदीयमाक्रंदितं आर्त्तघोषणं आर्त्तेष्वापन्नेषु साधोर्हितकारिणो नृपस्य नगेंद्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु किरणा प्रग्रहो रश्मिरित्यमरः आदाय गृहीत्वेव निवर्त्तयामास २८ सइति धनुर्द्धरः सः नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं स्थितं ष्ठा गतिनिवृत्तौ क्वसुप्रत्ययः केसरिणं सिंहं सानुमतो रद्रेः धातोर्गैरिकस्य विकारो धातुमयी तस्यामधित्यकायां ऊर्ध्वभूमौ उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका इत्यमरः उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः प्रफुल्लं विकसितं फुल्ल विकसने इति धातोः शावरो लोध्रद्रुममिव ददर्श प्रफुल्लमिति कारपाठे त्रिफला विशरणे इति धातोः कर्त्तरि क्तः उत्परस्यात इत्युकारादेशः २९ ततइति ततः सिंहदर्शनानंतरं मृगेंद्रगामी सिंहगामी शरणो रक्षणे शरणं गृहरक्षित्रोरित्यमरः शरणं वधरोगयोः इति यादवः शरणे साधुः शरण्यः तत्र साधुरिति यत्प्रत्ययः प्रसभेन बलात्कारेण उद्धृता अरयो वैरिणो येन स नृपतिः जाताभिषङ्गो जातपराभवः सन् अभिषङ्गः पराभव इत्यमरः वध्यस्य वधार्हस्य दंडादिभ्य इति यत्प्रत्ययः मृगेंद्रस्य वधाय निषंगात् तूणीरात् तूणोपासंगतूणीरनिषंगा इषुधीर्द्वयोरित्यमरः शरमुद्धर्त्तुमैच्छत् ३० वामेतर इति प्रहर्त्तुस्तस्य वामेतरः दक्षिणः करो नखप्रभाभिः भूषितानि विच्छुरितानि कंकस्य पक्षिविशेषस्य पत्राणि यस्य तस्मिन् कंकः पक्षिविशेषः स्यात्कंकालोहपृष्ठे इति विश्वः कंकः कर्कट इति यादवः सायकस्य पुंखे एव कर्त्तर्या कर्त्तर्याख्यमूलप्रदेशे कर्त्तरी पुंख इति यादवः सक्तांगुलिः सन् चित्रार्पितारंभः चित्रलिखितवृत्तिः शरोद्धरणाद्योग इवावतस्थे ३१

तदीयमाक्रंदितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादाय नगेंद्रसक्तां निवर्त्तयामास नृपस्य दृष्टिं २८

स पाटलायां गवि तस्थिवांसं धनुर्द्धरः केसरिणं ददर्श अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९

ततो मृगेंद्रस्य मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः जाताभिषंगो नृपतिर्निषंगादुद्धर्त्तुमैच्छत्प्रसभोद्धृतारिः ३०

बाह्विति बाह्वोः प्रतिष्टंभेन प्रतिबंधेन विवृद्धमन्युः प्रवृद्धरोषो राजा मंत्रौषधिभ्यां रुद्धवीर्यः प्रतिबद्धशक्तिर्भोगीस
र्प इव भोगी राजा भुजंगयोरिति शाश्वतः अभ्यर्णमासन्नमागस्कृतमपराधकारिणमस्पृशद्भिः स्वतेजोभिरंतर्द
र॰वं॰ ह्यत अर्थिहोपायस्तह्नौ तेजः प्राणात्यये ऽप्यपीति यादवः ॥ ३१ तमिति निगृहीतायेनुः स सिंहः आर्याणां सतां
टी॰ २॰ गृह्यं पक्ष्यम् यदाह स्वैरिवाह्यविपाणि पुच्छेतिका पुराणार्थः मनुवंशस्य केतुं चिह्नं केतुवद्व्यावर्तकं भूपालं पुसिंह
२० इव गुरुसत्वो महाबलस्तं आत्मनोहृतौ बाहुसंभवेन व्यापारेण भूतपूर्वं त्वाद्विस्मितं कर्तृरिक्तः तं दिलीपं म
नुष्यवाचा करणेन पुनर्विस्मापयन् सविस्मयमाश्चर्यं प्रापयन्निति जगाद सिंहः ईषद् सनइति योर्णाचिह नो॰

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे सक्तांगुलिः सायकपुंख एव चित्रार्पितारंभ इवावतस्थे ३१
बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवी
र्यः तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् विस्मापयन्विस्मितमात्मवृत्तौ सिंहोरुसत्वं निजगाद सिंहः

ह्ये आयादेशेशान्तप्रत्ययेचसतिविस्मापयन्निति रूपं सिद्धं विस्मापयन्निति पाठे गुणागमभावश्चवक्तव्यं नव्युत्पत्तिसस
यतेरिति हेतुस्मयविवक्षायामात्मनेपदं भवति भीस्मोर्हेतुभये इत्यात्मनेपदे विस्मयमान इति स्यात् यद्वा मनु
ष्यवाक्प्रयोज्यकर्त्री विस्मापयतेनयासिंहो विस्मापयन्निति तिरोपनावरौत्येनेति व्याख्येयं करणविवक्षायांनक
श्चिद्दोषः ३२ अलमिति हे महीपाल तव श्रमेणालं साध्याभावेन कर्तव्य इत्यर्थः अत्र गम्यमानसाधनक्रियापे
क्षया श्रमस्य करणत्वात् तृतीया उक्तं च न्यासोद्योते नकेवलं श्रूयमाणैव क्रियानिमित्तं करणभावस्यापितर्हि ग
म्यमानापीति अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः इतोस्मिन्नपि सावधिभक्तिकस्तसिल् प्रयुक्त
मप्यस्त्रं वृथा स्यात् तथाहि पादपोन्मूलनेशक्तिर्यस्य तत्तथोक्तं मारुतस्यरंहो वेगः शिलोच्चये पर्वतेनमूर्छति न प्रस

कैलासेति कैलासे लसो दर्पणोऽस्येति कैलासः स्फाटिकः कैलासस्यायं कैलासः कैलासश्च स गौरश्च शुभ्रं वृषमारुरुक्षोरारोढुमिच्छोः स्वामी
करवं शुभ्रं च गौरमाङ्गुर्मनीषिणा इति शाश्वतः स एषोऽपवित्रपदं निर्दिष्टं वृषमारोहतीत्यर्थः अष्टौ मूर्तयो यस्याष्टमूर्तेः शिवस्य पा
दार्पणं पादन्यासस्तदेवानुग्रहः प्रसादस्तेन पूतं पृष्ठं यस्य तथोक्तं निकुम्भमित्रं कुम्भोदरं नाम किंकरं मामवेहि विद्धि पृथिवी
सलिलं तेजो वायुराकाशमेव च सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्तय इति यादवः ३५ अमुमिति पुरः अग्रे अमुं देवदा
रुं पश्यसीति काकुः असौ देवदारुः वृषभो ध्वजो यस्य तेन शिवेन पुत्रीकृतः पुत्रत्वेन स्वीकृतः अभूततद्भावे च्विः यो देवदा

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य
३४ कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् तैलं
अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ३६
कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ३७

रुः स्कन्दस्य मातुर्गौर्याः हेम्नः कुम्भ एव स्तनस्तेन तस्माद्वा निःसृतानां पयसामम्बूनां रसज्ञः स्वादज्ञः स्कन्दपक्षे हेमकुम्भ इव स्तन
इति विग्रहः पयसी क्षीरनीरयोः पयः क्षीरं पयोऽम्बु चेत्यमरः स्कन्दसमानप्रेमास्पदमिति भावः ३६ कण्डूयमानेनेति क
दाचित्कटं कपोलं कण्डूयमानेन कर्षता कण्ड्वादिभ्यो यक् ततः शानच् वन्यद्विपेनास्य देवदारोस्त्वगुन्मथिता अथा
द्रेस्तनया गौरी असुरास्त्रैरालीढं क्षतं सेनां नयतीति सेनानीः स्कन्दः पार्वतीनन्दनः स्कन्दः सेनानीरित्यमरः सत्सूद्वि
षेत्यादिना क्विप् तमिव एनं शुशोच ३७ तदेति तदा तत्कालः प्रभृतिरादिर्यस्मिन्कर्मणि तत्तथा तदाप्रभृत्येवेत
द्विनमारभ्यैव वनद्विपानां त्रासार्थं शूलभृता शिवेनाङ्के समीपमागताः प्राप्ताः सत्त्वाः प्राणिनो हन्ति यस्मिंस्तत् श्री
कः समीपं तत्संगे चिह्नेऽस्यानावराय योगि इति केशवः सिंहत्वं विधाय अस्मिन्नद्रिकुक्षौ गुहायामहं व्यापादितः नियु

र्यस्य सः अंकागतस
त्ववृत्तेः ८

तस्येति परमेश्वरेण प्रदिष्टो निर्दिष्टः कालो भोजनवेला यस्याः सा उपस्थिता प्राप्ता एवं गोरूपा शोणितपारणा सुरद्विषो राहो
श्चन्द्रमसः इयं चान्द्रमसी सुधेव तस्य क्षुधितस्य तृप्त्यै तस्य तृप्त्यै अलं पर्याप्ता नमः स्वस्तीत्यादिना चतुर्थी ३९ स इति
स एवमनुपायभूतत्वं लज्जां विहाय निर्वर्तस्व भवांस्तु गुरौ दर्शिता प्रकाशिता शिष्यकर्तव्या भक्तिर्येन स तथोक्तः इति ननु २८
र·वे· गुरुरयं न विनाश्य कथं तन्मामीयं गच्छेयमत आह शस्त्रेणेति यद्रक्ष्यं यत्न शस्त्रेणायुधेन शस्त्रमायुधलोहयोरित्यमरः
टी·२१ अशक्यारक्षायस्तदशक्यरक्ष्यं रक्षितुमशक्यमित्यर्थः तद्रक्षणेन स्मयमपि शस्त्रभृतां यशो न हि नास्ति अशक्यार्थे एव प्रतिवि
२१ धानेन दोषायेति भावः ४० इतीति पुरुषाणामधिराजो नृपः इति प्रगल्भं प्रौढं मृगाधिराजस्य सिंहस्य वचो निशम्य श्रु
त्वा गिरिशस्य शिवस्य प्रभावात् प्रत्याहतास्त्रः कुंठितास्त्रः सन् आत्मनि विषये अवज्ञामपमाने शिथिलीचकार तत्याजेत्यर्थः

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतस
त्ववृत्तिः ३८ तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता शोणितपारणा मे सुरद्वि
षश्चान्द्रमसी सुधेव ३९ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः शस्त्रेण रक्ष्यं यदश
क्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ४० इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य प्र
त्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ४१ ॥

अवज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः समानेषु हि विजयिनामभिमानः न सर्वेश्वरं प्रतीति भावः ४१ प्रत्यब्रवीदिति स
एव प्रथमः संगः प्रतिबंधो यस्य तस्मिन् तत्पूर्वसंगे इषुप्रयोगे वितथप्रयत्नो विफलप्रयासः अत एव वज्रे कुलिशं मु
क्तवन्तो नाकुमिव कुनहादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविरित्यमरः त्र्यंबकं त्रिलोचनं दृष्टवति निजलोचनवह्निना नय २९
नाभ्यां केतरणाद्वीरपीति हलायुधः त्रीणि अंबकानि यस्य सः त्र्यंबको हरः तस्य वीक्षितेन वीक्षणेन जडीकृतो ॥ श्रीराम

निस्पंदीकृतः वज्रंपाणौयस्यसवज्रपाणिरिंद्रः प्रहर्तुरगार्थ्यभ्यदैर्पेनिष्टासममेभोत्तः इतिवज्रव्यमितिपारोऽस्तमस्य
तस्योत्तरनिपातः अतएवज्ञापकाद्व्यधिकरणपदोपिवहुव्रीहिः सएवसिंहोनृपः एनंसिंहं प्रत्यब्रवीत् वाहुसं
वज्रंशक्रस्यक्रुद्धस्यास्तंभयद्यःप्रभुरितिमहाभारते ४२ संरुद्धेति हेमृगेन्द्र संरुद्धचेष्टस्यप्रतिवद्धव्यापारस्यमम।
तद्वचःवाक्यंकामंहास्यंपरिहसनीयं यद्वचःसत्त्वंमदीयेनत्यादिकमहंविवक्षुर्वक्तुमिच्छुरस्मि तर्हितूष्णींस्थीय
तामित्युक्तवहिरप्रकाशितमेवेत्याशंक्यईश्वरकिंकरत्वात्सर्वज्ञत्वात्प्रतिनहास्यमित्याह अन्तरिति हि यतोभवान्प्रा

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः जडीकृतस्त्र्यंबकवीक्षितेन वज्रं मुमुक्षन्निव
वज्रपाणिः ४२ संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः अन्तर्गतं प्राणभृतां हि वे
द सर्वं भवान्भावमतोभिधास्ये ४३ मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः गुरो
रपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ४४

णभृतामन्तर्गतेहृद्गतंवाग्व्यापारेवहिरप्रकाशितमेवसर्वंभावंवेदवेत्ति विदोलटोवेतिणलादेशः अतोहमभि।
धास्येवक्ष्यामि वचइतिप्रकृतकर्मसेवध्यते अन्यत्वीदृग्वचनमाकर्णासंभावितार्थमतमित्युपहसेयहरति।
अनल्पोमौनमेवभूषणं त्वंतुअवाङ्मनसयोःएकविषयत्वायमितिजानासि अतोभिधास्येयदहंवोढविवक्षुरि
त्यर्थः ४३ मान्यइति प्रत्यवहारःप्रलयःस्थावराणांतरुशैलादीनांजंगमानांमनुष्यादीनांसर्गस्थितिप्रत्यव
हारेषुहेतुःसईश्वरोमेममामान्यःपूज्यःअलंघ्यशासनःइत्यर्थःशासनेचसिंहत्वमेकागतसत्वहत्नीत्युक्तमेव
पेतर्हिविसृज्यगम्यतां नेत्याह गुरोरपीति पुरस्तादग्रेनश्यदिदमाहिताग्नेर्गुरोर्धनमपिगोरूपमनुपेक्षणीये

४७

सरति यः श्रेकागतसत्वहन्निंत्वमदीयेनदेहेनशरीरस्यहन्निंजीवनेतिवर्त्तयितेसंपादयितेप्रसीददिनावसानेउन्न
कोमातामममागमिष्यतीत्युत्कंठितोवालवत्सायस्याःसामहर्षेरियंयेनर्विमुच्यतांविसृज्यतां ४५ श्रथेति श्रथ
२·वं· भूतेश्वरस्यपार्श्ववर्त्तीश्रनुचरःसिंहःगिरेर्गह्वरागांगुहानांदेवखातविलेगुहागह्वरमित्यमरः श्रंधकारैर्ध्वा
टी·२२ तंदेष्ट्रागांमयूखैःशकलानिखंडानिकुर्वन्निरसन्नित्यर्थःकिंचिद्विहस्यार्थपतिंनृपंभूयोवभाषेहासकार
२२ गामल्पस्यहेतोर्वहुहातुमिच्छन्नितिवच्यमाणंद्रष्टव्यं ४६ एकेति एकातपत्रंएकछत्रंजगतःप्रभुत्वंस्वामित्वं
यौ४ नववयोवनमिदंकांतरम्यंवपुश्चेति एवंवहुश्रल्पस्यहेतोरल्पेनकारणेनश्रल्पफलायेत्यर्थःषष्ठीहेतोःप्रयो

सत्वंमदीयेनशरीरहन्निंदेहेनतिर्वर्त्तयितेप्रसीद दिनावसानोत्सुकवालवत्साविमुच्यतांयेनुरियंमहर्षेः
श्रथांधकारंगिरिगह्वरांणांदंष्ट्रामयूखैःशकलानिकुर्वन् भूयःसभूतेश्वरपार्श्ववर्त्तीकिंचिद्विहस्या
र्थपतिंवभाषे ४६ एकातपत्रंजगतःप्रभुत्वंनववयःकांतमिदंवपुश्च श्रल्पस्यहेतोर्वहुहातुमिच्छ
न्विचारमूढःप्रतिभासिमेत्वं ४७ भूतानुकंपातवचेदियंगौरेकाभवेत्स्वस्तिमतीत्वदंते जीवन्पु
नःशश्वदुपप्लवेभ्यःप्रजांप्रजानाथपितेवपासि ४८

गइतिषष्ठीहानंत्यक्तुमिच्छुस्त्वंविचारेकार्याकार्यविमर्शेमूढोमंदःप्रतिभासि ४७ भूतेति तवभूतेषनुकंपादयाचेत्
कृपादयानुकंपास्यादित्यमरः इयंगौरेवएवंत्वदंतेचेदित्यर्थःतर्हित्वदंतेतवनाशेसतिश्र्यमेकागौःस्वस्तिहेममस्यास्तीति
स्वस्तिमतीभवेज्जीवेदित्यर्थःस्वस्त्याशीःक्षेमपुण्यादावित्यमरः हेप्रजानाथजीवन्पुनःपितेवप्रजाःउपप्लवेभ्योवि
पद्भ्यःशश्वत्सदापुनःसदापुनःसदार्थयोःशश्वदित्यमरः पासिरक्षसिस्वप्राणव्ययेनएकयेनरक्षणादवंजीवनमे २२

नयमित्यादियं प्रवृत्तिः किंनु गुरुभयादित्यत्राह अथेति एकधेनोः अथवा एकैव धेनुर्यस्य स तस्मात् अयं कोपकारणो।
पराध इति विज्ञेयं अत एवापराधे गवां पीडने सति चण्डात् अतिकोपनात् चण्डस्त्वत्यन्तकोपन इत्यमरः अत एव कृशानु
प्रतिमा उपमा यस्य तस्मात् अग्निकल्पात् गुरोः बिभेषीति काकुः भीतार्थानां भयहेतुरित्यपादानात् पंचमी अल्पविनाशस्य यत
हानिरतिदुःसहेति भावः अस्य गुरोर्मन्युः क्रोधः मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः घटा इवोधांसि यासां ता घटोध्नीः ऊधस
नङ् इत्यनङादेशः बहुव्रीहेरूधसो ङीष् कोटिशो गाः स्पर्शयता प्रतिपादयता विश्राणनं वितरणं स्पर्शनं प्रतिपा
दनमित्यमरः भवता विनेतुमपनेतुं शक्यः ४९ तदिति तत् तस्मात् कारणात् कल्याणपरंपराणां भोक्तारं कर्मणि षष्ठी

अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटो
ध्नीः ४९ तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहम् महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं प
दमैन्द्रमाहुः ५० एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थं

ऊर्जो बलमस्यास्तीत्यूर्जस्वलं ज्योत्स्नातमिस्रेत्यादिना वलच्प्रत्ययान्तो निपातः आत्मदेहं रक्ष ननु गां मुञ्चेत्यत आत्मदेह र
क्षणेऽस्य गृहहानिः स्यात् नेत्याह महीतलेति ऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसंबन्धमात्रेण भिन्नमैन्द्रं इन्द्र
संबन्धि पदं स्थानमाहुः ऋद्धिमद्राज्यं स्वर्गान्न भिद्यत इत्यर्थः ५० एतावदिति मृगेन्द्रे एतावदुक्त्वा विरते विरामं सति गु
हागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः शैलोऽपि प्रीत्या तमेवार्थं पूर्वोक्तं वाक्यं क्षितिपालमुच्चैरभाषतेवेत्युत्प्रेक्षा भा
षिरयं ब्रुविसमानार्थत्वाद्द्विकर्मकः ब्रुविस्तु द्विकर्मकेषु पठितः तदुक्तं दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनि
मित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविनेति ५१ निशम्येति देवानुचरस्येश्वरस्य
किंकरस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरप्युवाच॥

किंभूतः सन् तेनासिंहेन यदध्यासितमाक्रमणं नपुंसके भावे क्तः तेन कातरे दीने अक्षिणी यस्यास्तया बहुव्रीहौ सक्थ्या
क्ष्णोः स्वाङ्गात्षच् षिद्गौरादिभ्यश्चेति ङीष् किं वा च्यवतीति भीत्येव स्थितयेत्यर्थः धेन्वा निरीक्ष्यमाणोत एव सुतरां द।
र.वं. यालुः सन् सुतरामित्यत्र द्विवचनविभज्येत्यादिना तरप् शब्दात्तरप् किमेत्तिङव्ययेत्यादिना आमु प्रत्ययः तद्धितश्चासर्ववि
टी. २३ 23 भक्तिरित्यव्ययसंज्ञा ५२ किमुवाचेत्यत्राह क्षतादिति क्षणु हिंसायामिति धातोः संपदादित्वात्क्विप् गमादीनामिति
वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धं क्षतो नाशात्त्रायत इति क्षत्रं सुपीति योगविभागात्कः नामैतोनुत्य

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः
सुतरां दयालुः ५२ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्वि
परीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५२

त्तिकविरर्थेनोनक्रामति क्षतादित्यादिना उदग्र उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाचकः क्षत्रशब्द इत्यर्थः सोयं क्षतात्त्राय
त इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाम्नकर्णादिवत्केवलरूढः किं तु पंकजादिवद्योगरूढ इत्यर्थः।
ततः किमित्यत आह तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतात्त्राणमकुर्वतः पुंसो राज्येन किं उपक्रोशम।
लीमसैर्निंदामलिनैः उपक्रोशमलीमसैर्निंदामलिनैः उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे इत्यमरः ज्यो।
त्स्नातमिस्रेत्यादिना मलीमसशब्दो निपातः मलीमसं तु मलिनं कच्चरं मलदूषितमित्यमरः प्राणैर्वा किं निंदितस्य स
र्वं व्यर्थमित्यर्थः एतेनैकातपत्रमित्यादिना श्लोकद्वयोक्तं प्रत्युक्तमिति वेदितं ५२ अथैकधेनोरित्यत्रोत्तरमाह कथमिति २३

अनुनयः क्रोधापनयः चकारो वाकारार्थः महर्षेर्वनुनयो वा अन्यासां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात्क-
थं शक्यो न शक्य इत्यर्थः अत्र हेतुमाह इमां गां सुरभेः कामधेनोः पंचमी विभक्तेः इति पंचमी अनूनां न्यूनामेवेहि
जानीहि तर्हि कथमस्याः परिभवो भूदित्यत आह रुद्रेति अस्यां गवि त्वया कर्त्री प्रहृतं तत्प्रहारस्तु नपुंसके भावे क्तः
रुद्रौजसा ईश्वरसामर्थ्येन न तु न तवेत्यर्थः समम्यधिकरणे चेत्यधिकरणे सप्तमी ५४ तर्हि किं चिकीर्षितमित्यत्राह
सेयमिति सेयं गौर्मया निष्क्रियते प्रत्याह्रियते नेनेन परगृहीतमिति निष्क्रियः प्रतिशीर्षके परजिभ्योऽच्प्रत्ययः

च = कथं नु शक्योनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्व-
यास्यां ५४ सेयं स्वदेहार्पणनिष्क्रियेण न्याय्या मया मोचयितुं भवत्तः न पारणा [भोजनम्] स्याद्विहता तवैवं भवे-
दलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं परवान् [वशतेः] अवैति [वेत्ति] महान्हि यत्नस्तव देवदारोः स्थातुं नियोक्तु-
र्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन [नियुक्तेन] ५६

देहार्पणमेव निष्क्रियः तेन भवत्तः भवतः पंचम्यास्तसिल् मोचयितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः धर्मपथ्यर्थे-
त्यादिना यत्प्रत्ययः एवं सति तव पारणा भोजनं विहता न स्यात् मुनेः क्रियार्थो होमादिः स एवार्थः प्रयोजनं स चालु-
प्तो भवेत् स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः ५५ अत्र भवानेव प्रमाणमित्याह भवानिति पर-
वान् स्वामिपरतंत्रो भवानपि इदं वक्ष्यमाणमवैति वेत्ति भवतात्मभूयत एवेत्यर्थः शेषे प्रथम इति प्रथमपुरुषः
किमित्यत आह हि यस्माद्धेतोर्हि हेतावधारणे इत्यमरः तव देवदारुविषये महान् प्रयत्नः महता प्रयत्नेन र-
क्षित इत्यर्थः इदं शब्दोक्तमर्थं दर्शयति स्थातुमिति रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन ।
नियुक्तेनेति शेषः योक्तुः स्वामिनोऽग्रे स्थातुं न शक्यं ५६

र॰वं॰
टी॰ २८
24

सर्वथा चेतदप्रतिहार्यमित्याह किमिति किमपि केनापि हेतुना न तवाहं अहिंस्यः अवध्यो मतश्चेत्तर्हि मे यशःएव शरी
रं तस्मिन्दयालुर्भव ननु मरणमपेक्ष्याम्र स्वशरीरे कोऽभिनिवेशस्तत्राह एकांतेति मद्विधानां मादृशानां विवेकि
नामेकांतविध्वंसिषु अवश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु पिंडेषु शरीरेषु अनास्थानपेक्षा आ
स्था तु लेवनस्यानवत्वापेक्षा सकथ्यत इति विम्बः ५७ सौहार्दादहमनंतरशरणीयोऽस्मीत्याह संबंधेति संबंधं स
ख्यमाभाषणमालापः पूर्वं कारणं यस्य तमाहुः आभाषणमालापः इत्यमरः स तादृक् संबंधो वनांते संगतयो
र्नौ आवयोर्वृत्तः जातः तत्तस्माद्धे भूतनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति अत एव संबंधिनो मि
त्रस्य मे प्रणयं याञ्चां प्रणयास्त्वभ्यर्थना विस्रंभयाञ्चाप्रेमाणश्च इत्यमरः विहंतुं नार्हसि ५८ तथेति तथेति गां मुक्त

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौ
तिकेषु ५७ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते तद्भूतनाथानुग नार्हसि त्वं संबंधिनो
मे प्रणयं विहंतुम् ५८ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः सन्यस्तशस्त्रो हरये
स्वदेहमुपानयत्पिंडमिवामिषस्य ५९ तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं

वनेत्युक्तवते हरये सिंहाय कपोतेऽहेश्च वर्णे च विस्रंते चैव हरिर्विदुरिति शाश्वतः सद्यस्तत्क्षणं प्रतिष्टंभात्स्तंभाद्वि
मुक्तो बाहुर्यस्य स दिलीपः न्यस्तशस्त्रः त्यक्तायुधः सन् स्वदेहमामिषस्य मांसस्य पललं क्रव्यमामिषमित्यमरः
पिंडं कवलमिव उपानयत् समर्पितवान् एतेन निर्ममत्वमुक्तं ५९ तस्मिन्निति तस्मिन्क्षणे उग्रं सिंहनिपात
मुत्पश्यतः उत्प्रेक्षमाणस्य तर्कयतोऽवाङ्मुखस्याधोमुखस्य प्रजानां पालयितुः राज्ञ उपरि पुष्पवृष्टिरिति निपा २८
तः विद्याधराणां देवविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ६०॥

उत्तिष्ठेति राजा अमृतमिवाचरतीत्यमृतायमानं उपमानादाचार इति क्यच् ततः शानच् उत्थितमुत्थितं हे वत्स उत्ति
ष्ठेति वचो निशम्य श्रुत्वा उत्थितः सन् अत्रोत्थितः शब्दः प्रत्ययः अग्रतः प्रस्रवः क्षीरप्रस्रावो यस्याः सा तां प्रस्रविणीं गां स्वां
जननीमिव ददर्श सिंहं न ददर्श ॥६१॥ तमिति विस्मितमाश्चर्यं गतं कर्तरि क्तः तं दिलीपं धेनुरुवाच किमित्यत्राह
हे साधो मया मायामुद्भाव्य कल्पयित्वा परीक्षितोऽसि ऋषिप्रभावान्मयि अन्तकोऽपि यमोऽपि प्रहर्तुं न प्रभुः न सम
र्थः न समर्थाः अन्ये हिंस्राः घातुकाः शरारुर्घातुको हिंस्र इत्यमरः नमिकंपीत्यादिना र प्रत्ययः किमुत स्तुत्युत
प्रभव इतियोऽर्थः बलवत्सु किमुत सुष्टु अतीव च निर्भर इत्यमरः ॥६२॥ भक्त्येति हे पुत्र गुरौ भक्त्या मयि अनुकं

अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥६०॥ उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्यो
त्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥६१॥ तं विस्मितं धेनुरुवा
च साधो मायां मयोद्भाव्य परीक्षितोऽसि ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥
भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रस

पया च तेन भक्त्या प्रीतास्मि क्रियाग्रहणमपि कर्तव्यमिति चतुर्थी वरं देवेभ्यो वरणीयमर्थं देवाद्वृते वरः श्रेष्ठे त्रि
षु क्लीबे मनाक्प्रिये इत्यमरः वृणीष्व स्वीकुरु तथाहि मां केवलानां पयसां प्रसूतिं कारणं नावेहि न हि विद्धि
किंतु प्रसन्नां कामान्दोग्धीति कामदुघां मामवेहि दुहः कप् घश्चेति कप् प्रत्ययः ॥६३॥ ततइति मानितार्थी
इ जितानितिथिः स्वहस्तार्जितो वीर इति शब्दो येन सः एतेनास्य दानत्वं दैन्यराहित्यं अदैन्यं चोक्तं स राजा हस्तौ स
मानीय संधाय अञ्जलिं बध्वेत्यर्थः वंशस्य कर्तारं प्रवर्तयितारं अनन्यवरतुकुलमिति प्रसिद्धं अनंतकीर्त्तिं स्थिर

संतानकामायेति सा पयस्विनी गौः संतानकाम यतश्चेति संतानकामः कर्म्मिशपरा तस्मै राज्ञे तथेति काम्यतइति कामोव
रःकामोर्थ इत्यन्वयः तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र मदीयं पयः पत्रपुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुंक्ष्व पिवेति ड
र०वं० उपभुंक्ष्वेति वा पाठः तं मा दिदेश आज्ञापितवती ६५ वत्सस्येति हे मातः वत्सपीतस्य शेषं वत्सपीतावशिष्टमित्ययम
टी०२५ र्थः होमस्यार्थस्तस्य विधिरनुष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः तव ऊधसि भवं ऊधस्यं क्षीरं शरीरावयवा
२५ च्चेति यत्प्रत्ययः रक्षिताया उर्व्याः षष्ठांशं षष्ठभागमिव त्वदनुज्ञां मत्प्रियगम्य उपभोक्तुमिच्छामि ६६ इत्थ
मिति इत्थं क्षितीशेन विज्ञापिता वसिष्ठधेनुः प्रीततरा पूर्वमेव शुश्रूषया प्रीता संप्रत्यनया विज्ञापनया प्रीततरा

ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः वंशस्य कर्तारमनंतकीर्तिं स दक्षिणायां त
नयं ययाचे ६४ संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा दुग्ध्वा पयः पत्रपुटे म
दीयं पुत्रोपभुंक्ष्वेति तमादिदेश ६५ वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः ऊ
धस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ६६ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता
प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण सा ६७ तस्याः प्रसन्नेन्दुमुखः
प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ६८

मिसंतुष्टा बभूव तदन्विता तेन दिलीपेनान्विता हैमवताद्धिमवत्संबंधिनः कुक्षेर्गुहायाः सकाशादश्रमेणानाया
सेनाश्रमं प्रत्याययौ आगता ६७ तस्या इति प्रसन्नेन्दुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिह्नैर्मुख
रागादिभिरनुमितमनुहितं तस्या धेनोः प्रसादमनुग्रहं प्रहर्षचिह्नैरेव ज्ञातत्वात्पुनरुक्तयेव वाचा गु २५
रवे निवेद्य विज्ञाप्य पश्चात्प्रियायै शशंस कथितस्यैव कथनं पुनरुक्तिः न चेह तदस्ति किंतु चिह्नैः कथितप्राय

तस्मा २

सेति अनिंदितात्मा अगर्हितस्वभावः सन् वत्सलः प्रेमवान् सद्वत्सलः वत्सांसाभ्यां कामबले इति वलच्प्रत्ययः वसि-
ष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन् वत्सस्य हुतस्य चावशेषं पीतं कृत्वा वशिष्ठेन दत्त्वाः स्तन्यं क्षीरं शुभ्रं मूर्तं परिच्छि-
न्नं यश इवातितृष्णः सन् पपौ ६९ प्रातरिति वशी वशिष्ठः प्रातर्यथोक्तस्य व्रतस्य पूर्वोक्तरूपस्य अंगभूतायाः पारणा-
तस्याः अन्ते प्रास्थानिकं प्रस्थाने भवं तत्कालोचितमित्यर्थः कालाट्ठञिति ठञ्प्रत्ययः यथाकथंचिद्गुणवृत्त्यापि
कालेवर्तमानत्वात्प्रत्यय इष्यत इति वृत्तिकारः ईयते प्राप्यते अनेनेत्ययनं स्वस्त्ययनं शुभावहमाशीर्वादं प्रयुज्य

स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सहुतावशेषम् पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवा-
तितृष्णः ६९ प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य तौ दंपती स्वां प्रति राजधानीं प्रस्था-
पयामास वशी वसिष्ठः ७० प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुंधतीं च धेनुं सवत्सां च नृपः प्रतस्थे
सन्मंगलोदग्रतरप्रभावः ७१ श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ययावनुद्घातसुखे-
न मार्गं स्वेनेव पूर्णेन मनोरथेन ७२

तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास ७० प्रदक्षिणीकृत्येति नृपः हुतमश्नातीति हुताशः कर्मण्यण्।
तं भर्तुर्मुनेरनन्तरं प्रदक्षिणानन्तरमित्यर्थः अरुंधतीं च धेनुं सवत्सां च प्रदक्षिणीकृत्य प्रगतो दक्षिणं प्रदक्षि-
नि — णं तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः ततः च्विः अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य सद्भि-
र्मंगलैः प्रदक्षिणादिभिः मंगलाचारैः उदग्रतरप्रभावः सन् प्रतस्थे ७१ श्रोत्रेति धर्मपत्नीसहितः सहिष्णुर्द्व-
न्द्वादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना मंगमनजुद्घातः पाषाणादिप्रतिघातरहितः अतएव सुख-
यतीति सुखः तेन स्वेन मार्गं स्वेन पूर्णेन सकलेन मनोरथेनेव ययौ मनोरथपक्षे ध्वनिः स्तुतिः अनुद्घातः प्रतिब-
न्धरहितः ७२ तमिति अदर्शनेन प्रवासनिमित्तेन आहितौत्सुक्यं जनितदर्शनोत्कंठं प्रजाः अर्थनसंतानार्थं नवव्रतेन

= ह कि दि ह श्री

२५

र॰वं॰
टी॰ २६

कर्षिते कृशीकृते अंगे यस्याः तेन उदयेन वाभ्युदयेन प्रजानां लक्ष्मिमनाम वृद्धिरिति गम्यते । नेत्रैः औषधीनां नाथः सोमः इव पुष्यन्त्यास्तस्याः अन्यादृशेनाद्दृश्यत इत्यर्थः चन्द्रपक्षे अदर्शनेन कलाहानि निमित्ते प्रजार्थं लोकहितार्थं व्रते देवताभ्यः कलादाननियमः ते च सोमं पपुः देवाः पर्यायेणानुपूर्व्येण इति व्यासः उदयः आविर्भावः अन्यत्समानं ७३ पुरंदर इति
पुरः पुरीः शत्रूणां दारयतीति पुरंदरः शक्रः शर्ववयोदारि सहोरिति खच्प्रत्ययः वाचंयमपुरंदरौ चेति मुमागमो
निपातः तस्य श्रीरिव श्रीर्यस्य सन्नयः पौरैरभिवंद्यमानः उत्पताकम् उच्छ्रितध्वजं पताका वैजयन्ती स्यात्केतनं
ध्वजमस्त्रियामित्यमरः पुरं प्रविश्य भुजंगेन्द्रेण समानसारे तुल्यबले सारो बले स्थिरांशे चेत्यमरः
तमाह्लितोन्नत्यम अदर्शनेन प्रजाः प्रजार्थव्रतकर्षितांगं नेत्रैः पपुस्तृप्तिमवाप्नुवद्भिर्नवोदयेन नाथमिवौष
धीनां ७३ पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिवंद्यमानः भुजे भुजंगेन्द्रसमानसारे भूयः स
भूमेर्धुरमासमंज ७४ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ७५ इति श्रीरघुवं
शे काव्ये कालिदासकृतौ नंदिनीवरप्रदानो नाम द्वितीयः सर्गः २॥

स्थिरत्यमरः भुजे भूयो भूमेर्धुरमाससंज अर्पितवान् अथेति अथ द्यौः सुरवर्त्म द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः
अत्रेर्महर्षेर्नयनात्समुत्थाने उत्पन्नं ज्योतिः समुत्तत आतश्चोपसर्ग इति कप्रत्ययः नक्षत्राणि दिवचेंद्र इमिवेत्यर्थः स्यादत्रि
नेत्रप्रसूत इति हलायुधः चंद्रस्याः त्रिनेत्रोद्भूतत्वमत्र कोऽहरिवंशे नेत्राभ्यां वारि सुस्राव दशधा द्योतयन्दिशः तं गर्भं
दशधा दृष्ट्वा दिशो देव्यो दधुस्तदा १ समेत्य धारयामासुर्न चैनास्तमशक्नुवन् स ताभ्यः सह सैवाथ दिग्भ्यो गर्भः
प्रभाविनः २ पपात भावयंल्लोकाञ्छीतांशुः सुरभावन इति सुरसरित् गंगा वह्निना निष्ठ्यूतं विक्षिप्तमैशं कोऽयं
इत्यनामिके चेत्यनेन निष्ठीवन्निष्ठीवतेः ककारस्यापि नत्वनत्वाप्तनिष्ठ्यूतं विहत्विमे विताः समा रत्यमरः पेशं तेजः २६

मेकेवलेथानमेरिते अग्निंसंयोजयामासुः पुत्रार्थं सर्वदेवताः १ देवकार्य्यमिदंदेव समाधत्स्वहुताशन शैलपुत्र्यामहं
तेजो गंगायांनिजउत्सृज २ देवतानां प्रतिज्ञाय गंगामभ्येत्य पावकः गर्भधारयवैदेवि देवतानामिदंप्रियम् ३ इत्येत
द्वचनं श्रुत्वादिव्यंरूपमधायत् तत्तस्यामहिमां हृष्टा समंतादवकीर्य्यच ४ समंततस्तदादेवीसमभ्यास्यच पावकं सम
वेशाना सिषर्णानिगंगायां रघुनंदनेति ५ राज्ञीसुदक्षिणानरपतेर्दिलीपस्यकुलभृत्यै संततिलक्षणायै गुरुभिम
हद्भिः लोकपालानामनुभावैस्तेजोभिरभितोनिविष्टमन्तःप्रविष्टं गर्भमाधत्तदधावित्यर्थः तत्रमनुः अष्टानां लोक
पालानां वपुर्धारयतेनृपइति अत्रयत्नेनयेनेनस्त्रीकर्त्तृकंगर्भधारणमात्रमुच्यते तथाच मंत्रेदृश्यते यथेयंपृथिवी।
मह्यातानामगर्भमदधे एवंत्वंगर्भमाधेहिदशमेमासिसूतवे इत्याश्वलायनानां सीमंतमंत्रे स्त्रीव्यापारेधारणशब्द
प्रयोगादिति मालिनीवृत्तमेतत् तदुक्तं ननमययुतेयं मालिनीभोगिलोकैरितिलक्षणात् ७५

इति श्रीपदवाक्यप्रमाणपारावारपारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां
एवाः संजीविनीसमाख्यायां द्वितीयः सर्गः २ ॥ ॐ उपाधिगम्योप्यनुपाधिगम्यः समावलोक्योप्यसमावलोक्यः भवोपियोभ
दभवः शिवोयं जगतः पायात् सपायात् १ राज्ञीगर्भमाधत्तेत्युक्तं सं प्रतिगर्भलक्षणानि वर्णयिष्यंप्रस्तौति।
अथेति अथगर्भधारणानंतरं सुदक्षिणाउपस्थितोदयं प्राप्तकालंभर्तुरीप्सितं मनोरथंभावेक्षः पुनः सखीजनस्या
क्षीलक्षणानां हृष्टीनां कौमुदीमुखंचंद्रिकाप्रादुर्भावे यद्वाकौमुदीनां कौमुदीदीपोत्सवतिथिः तदुक्तं भविष्योत्तरे।
कौमोदंते जनायस्यांतेनासौकौमुदीमतेति तस्यामुखंप्रारंभः अतएवकेचित् कौमुदीमुखस्य तिथिप्रवर्तेदंति इत्वा
कुलस्यसंततेरविच्छेदस्यनिदानं मूलकारणं निदानंत्वादिकारणमित्यमरः एवंविधं दोहदलक्षणागर्भचिह्नं
वक्ष्यमाणादुयौ स्वहृदयेनगर्भहृदयेनचद्विहृदयागर्भिणी यथाहवाग्भटः मातृजंखस्यहृदयंमातुश्चहृदयेनतत्
सं संबध्यतेचगर्भिण्याश्रेष्टं श्रद्धाभिमाननमिति तस्मेगर्भस्यंजंतदृदयंतन्मात्रहृदयेनघाततस्त्वंवयेनगर्भिण्या

नतं वेधित्वाऽऽभोदोहदमित्युच्यते साचतद्योगाद्दोहदवतीनीति तदुक्तं संग्रहे द्विहृदयांनारीदोहदिनीमाचक्षतइति अत्र
दोहदलक्षणास्येप्सितत्वेनकौमुदीमुखत्वेनच निरूपणाद्रूपकालंकारः अस्मिन्सर्गेवंशस्थंवृत्तं जतौतुवंशस्थ
मुदीरितंजराविति तल्लक्षणात् १ संप्रतिद्वाभ्यांतस्यागर्भलक्षणांवर्णयति शरीरेति शरीरस्यसादात्कार्श्याद
र॰वं॰ समग्रभूषणापरिमिताभरणालोध्रपुष्पवत्पांडुनामुखेनोपलक्षितासासुदक्षिणाविरलतारकास्थितत्वात्याय
टी॰ ३ सातयोक्ताविरलनक्षत्रेत्यर्थः तनुप्रकाशेनाल्पकांतिनामुखेनशशिनोपलक्षिताईषदसमाप्तप्रभातामभात
27 कल्पाप्रभातादीषन्न्यूनाइत्यर्थः तसिलादिष्वाकृत्वसुचेतिप्रभातशब्दस्यपुंवद्भावः शर्वरीरात्रिरिवालक्षितशरीर

अथेप्सितंभर्तुरुपस्थितोदयंसखीजनोद्वीक्षणकौमुदीमुखं निदानमिक्ष्वाकुकुलस्यसंततेःसुदक्षि
णादौहृदलक्षणंदधौ १ शरीरसादादसमग्रभूषणामुखेनसालक्ष्यतलोध्रपांडुना तनुप्रकाशेनवि
चेयतारकाप्रभातकल्पाशशिनेवशर्वरी २ तदाननंमृत्सुरभिक्षितीश्वरोरहस्युपाघ्रायनतृप्तिमाय
यौ करीवसिक्तंपृषतैःपयोमुचांशुचिव्यपायेवनराजिपल्वलम् ३ ॥

सादादिगर्भलक्षणमाहुर्वाग्भटः क्षामतागरिमाकुक्षेर्मूर्छाछर्दिररोचनं जृंभाप्रसेकःसदनंरोमराज्याःप्रकाश
नमिति २ तदाननमिति क्षितीश्वरोरहसिमृत्सुरभिमृदागंधितंतस्याआननंमुखमाघ्रायतृप्तिंनाययौ कमिव
शुचिव्यपायेग्रीष्मावसाने शुचिःशुद्धेनुपहतेशृंगाराषाढयोःसितेइतिग्रीष्मेकृतवह्नेपिस्यादुपधाशुद्धमंत्रिणी
तिविश्वः पयोमुचांमेघानांपृषतैर्बिन्दुभिः पृषंतिबिंदुपृषताःइत्यमरः सिक्तमुक्षितंवनराज्यांपल्वलमल्पसरः
प्राप्यकरीइवगजइव अत्रवनराजिपल्वलानांकांतकामिनीवदनस्यचसाधर्म्यमनुसंधेयं गर्भिणीनांमृद्ग
क्षणंलोकेप्रसिद्धमेव एतेनदौहृदाख्यंगर्भलक्षणमुच्यते ३ दोहदलक्षणमेवप्रपंचयति
दिवमिति ह्रियसादिगंतेविश्रांतरथस्यक्षत्रवर्तिनस्यास्त ॥ २८

नमरुत्तोमरुत्वानिंद्रः इंद्रोमरुत्वान्मघवेत्यमरः दिवं स्वर्गमिव भुवं भोक्ष्यते भुजोऽनवनेश्त्यात्मनेपदं अतः प्रथमे।
मासदहिराणां तथाविधे भुविकारस्मद्भूते राज्ञ्ये अभिलष्यतेत्यभिलाषो भोगपवस्तुतस्मिन् कर्म्मणि घञ् प्रत्ययः र
सांतेस्यास्वाद्यंत इति रसा भोग्यार्थाः अन्ये च ते रसा अन्यरसान्विलंघ्य विहाय मनो बबंध यनिदधावित्यर्थः दोहद सन्नद्ध
वतां स्वपुत्रभूभोगस्यैव नाष्पत्वमन्येदत्तेति ४ न मइति मगधस्य राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा तद्धिञ् प्रत्ययः
ना४ मगधकलिंगशूरसेनादेरणस्त्यर्थ प्रत्ययः ह्रिया किंचित्किमपि ईप्सितमिष्टमेम मे न शंसति तेनाचष्टे केषु वस्तुषु स्पृहा
वतीत्यनुवेलमनुक्षणमादृत आदरवान् कर्त्तरिक्तः आदरोऽनादरश्चितावित्यमरः प्रियासखीः सहचरीः उत्तर
कोसलेश्वरः दिलीपः पृच्छतिस्मपप्रच्छ लटः स्मइति भूतार्थे लट् सखीनां विश्रंभसंभवादिति भावः ५ उपेत्येति।

दिवं मरुत्वानिव भोक्ष्यते भुवं दिगंतविश्रांतरथो हि तत्सुतः अतोऽभिलाषे प्रथमं तथाविधे मनो बबंधान्यरसा
न्विलंघ्य सा ४ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी इति स्म पृच्छत्यनुवेलमा
दृतः प्रियासखीरुत्तरकोसलेश्वरः ५ उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं न ही
ष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ६ ॥ ४८

दोहदं गर्भिणीमनोरथः दोहदं दौहृदं श्रद्धा लालसे च समं स्मृतमिति हलायुधः सा सुदक्षिणा दोहदेन गर्भिणीमनो
रथेन दुःखशीलतां दुःखस्वभावतां उपेत्य प्राप्य यद्वस्तु वव्रे याचकोऽहं तदाहृतमानीतं भर्त्रेति शेषः तद्वस्तु अपश्यन्नदे
वालभतेत्यर्थः कुतः हि यस्मात्कारणात् सम्भवते दिष्टं वस्तु त्रिदिवेऽपि स्वर्गेऽपि अनासाद्यमनर्ग्गाध्यं नाभूत् किया
ज्यया नेत्याह अधिज्यधन्वनः नहि वीरपत्नीनामलभ्यं नाम किंचिदस्तीति भावः अत्र वाग्भटः यादृशो भाविदा
हैनोऽश्रद्धा च विवियात्मिकेति एतच्च पत्नीमनोरथपूरणाकरणे दृष्टदोषसंभवात् न तु राज्ञः स्त्रीलौल्यात् यदुक्तं
देयमप्यहितं तस्यै हितायाहृतमल्पकम् श्रद्धा विघाते गर्भस्य विहृतिश्च्युतिरेव च अन्यत्र दोहदस्याप्रदानेन गर्भो

रघु टि

क्रमेणेति सा सुदक्षिणा क्रमेण दोहदव्यथां च निस्तीर्य अतिक्रम्य प्रचीयमानावयवा पुष्यमानावयवा सती पुराणपत्त्रापगमान्
पगमान्नाशादनन्तरं संनद्धाः संजाताः ग्रथिता मनोज्ञाः पल्लवा यस्याः सा लतेव रराज ७ स्तनद्वयं वर्णयति दिनेष्वि
ति दिनेषु दोहददिवसेषु गच्छत्सु नितान्तपीवरमतिस्थूलमासमन्तान्नीलमुखं चूचुकं यस्य तत्तदीयं स्तनद्वयं भ्रमरैरभि
र॰वं॰ लीनयोरभिव्याप्तयोः सुजातयोः सुन्दरयोः पङ्कजकोशयोः पद्ममुकुलयोः श्रियं तिरश्चकार अत्र वाग्भटः श्यामलेष्ट
टी॰ २८ नाग्रत्नेनापीनो मे तान्योः स्व चूचुकौ इति ८ निधानगर्भामिति नृपः ससत्त्वामापन्नसत्त्वां गर्भिणीमित्यर्थः महिषीं निधि
२८ याने निधिर्गर्भे यस्यास्तां सागराम्बरां समुद्रवसनां भूमिमित्यर्थः तामिवाभ्यन्तरे लीनः पावको यस्यास्तां शमीमिव

क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा पुराणपत्त्रापगमादनन्तरं लतेव संनद्धमनोज्ञ
पल्लवा दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् तिरश्चकार भ्रमराभिलीनयोः सुजा
तयोः पङ्कजकोशयोः श्रियम् ८ निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् नदी
मिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ९ प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जि
तानां च दिगन्तसंपदाम् यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः १०

शमीतरौ वह्निरस्तीत्यत्र लिङ्गं शमीगर्भादग्निं मन्थतीति श्रुतेः अन्तःसलिलामन्तर्गतजलां सरस्वतीं नदीमिवामन्यत ९ तेन ग
र्भस्य भाग्यवत्त्वं तेजस्वित्वं पावनत्वानि विवक्षितानि ९ प्रियेति धीरः स प्रियायामनुरागस्य मनसः समुन्नतेः औदा
र्यस्य भुजेन भुजबलेनार्जितानां करेण वाणिज्यादिना वा दिगन्तेषु संपदां पुत्रो भविष्यतीति संतोषस्य च धृते
र्योगात्तेरेवं धारणार्थं च यथाविधिवेति विग्रहः सदृशीरनुरूपाः पुमान्सूयतेऽनेनेति पुंसवनं तदादिर्यासां ताः क्रियाः
यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान् आदिशब्देनानवलोभनसीमन्तोन्नयने गृह्येते अथ मासि द्वितीये तृती
ये वा पुंसवनं यदहः पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यादिति पारस्करः चतुर्थे नवलोभनमित्याश्वलायनः षष्ठेऽष्टमे २८
वा सीमन्तं रक्षेदिति याज्ञवल्क्यः १० सुरेन्द्रेति गृह्यागतेन नृपः सुरेन्द्राणां लोकपालानां मात्राभिरंशैः आश्रितं समानप्रवि

तयासहदक्षिणाया चंचलंनवलंचैवपारिस्नवेइत्यमरः ननंदस्नेवेंद्रमात्राश्रितेत्यत्रमनः अष्टाभिस्त्रस्तैर्वेद्राणांमात्राभिर्नि
र्मितोन्वयइति ११ कुमारेति अथकुमारभृत्याबालचिकित्सासंज्ञायांसमिजनिषदेत्यादिनाक्यप् तस्यांकुशले
रोगैर्हृतेगर्भिषग्भिर्वैद्यैःभिषग्वैद्यौचिकित्सकेइत्यमरः गर्भस्यभर्मणिणाभररोपोषणे भर्मह्रेमभृतिर्भर्मइति
शाश्वतः भृञोमनिप्रत्ययः अनुष्ठितेकृतेसतिकालेदशमेमासि अन्यत्रग्रीष्मावसानेप्रसवस्यगर्भमोचनस्यो
न्मुखीमासन्नप्रसवामित्यर्थः स्यादुत्पादेफलेपुष्पेप्रसवोगर्भमोचनेइत्यमरः अभ्रारपस्याःसंजाताभीत्यभितात्
त४१ दस्यसंजातेतारकादिभ्यइतिजितोप्रत्ययः दिवमिवपतिःप्रतीतस्त्वष्टः सन्नुरख्यातेहृष्टेप्रतीतइत्यमरः प्रियोदर्शी

स्तेरेन्द्रमात्राश्रितगर्भगौरवान्प्रयत्नमुक्तासनयागृहागतः तयोपचारांजलिखिन्नहस्तयाननेदक्षिणारि
प्लवनेत्रयान्वयः ११ कुमारभृत्याकुशलैरनुष्ठितेभिषग्भिराप्तैरथगर्भवेशनि पतिःप्रतीतःप्रसवो भर्मणि=
न्मुखींप्रियांददर्शकालेदिवमभ्रिताभिव १२ ग्रहैस्ततःपंचभिरुच्चसंश्रयैरसूर्यगैःसूचितभाग्यसंपदम्

गर्भमर्मराणीतिपाठेगर्भाधानप्रतीतैर्वैचिंत्यइतिभावः १२ ग्रहैरिति शच्याइंद्राण्यांसमा पुलोमजाशचीइंद्राणीत्यम
रः सास्तदक्षिणासमयेप्रसूतिकालेसतिदशमेमासीत्यर्थः दशमेमासिजायतेइतिश्रुतेः उच्चसंश्रयैःउच्चा
नस्थैरस्तंगस्यानगैःअसूर्यगैःअनस्तमितैःकैश्चिद्यथासंभवं पंचभिर्ग्रहैःसूचिताभाग्यसंपद्यस्यतंपुत्रंत्रीणि
प्रभावमंत्रोत्साहशक्तिकानिसाधनान्युत्पादकानियस्याःसात्रिसाधनाशक्तिःशक्तेयत्तित्वः प्रभावोत्साहमंत्रजाइ
त्यमरः अर्थ्यमर्थमिवाक्षतमक्षयं प्रासिगर्भविमोचनेइत्यादिशुप्रसवेतेनसमाज्ञानोःकर्मेरिलड्. अत्रेदमनुसंधे
यं अजवृषभमृगांगनाकुलीरोझषवणिजोचदिवाकरादितुंगाः दशशिखिमनुयुक्तितीथीन्द्रियांशैस्त्रिनवका
विंशतिभिश्चतेस्तनीचाइतिसूर्यादीनांसमानांग्रहाणांमेषवृषभादयोराशयःक्रमेणोच्चाःक्रमविशिष्टाः ॥श्रीराम

उच्चस्थानानि स्वस्वतुंगापेक्षयाऽस्तमस्थानानि नीचानि तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशा यथाक्रमं उच्चेषु परमोच्चानि नी
चेषु परमनीचानी निजातकग्रन्थोकार्थः अत्रांशस्त्रिंशो भागः यथाह नारदः त्रिंशद्भागात्मकं लग्नमिति स्तथ्य प्रत्यासन्नि
ग्रहाणामस्तमयो नाम तदुक्तं लघुमानसे रविणास्तमयो योगो वियोगस्तूदयो भवेदिति नेचलोच्चस्थाः फलंतिस्त्र
र॰ वे॰ टी॰ २४ स्तगा नापि नीचगाः तदुक्तं राजमृगांके स्वोच्चे दृष्टोऽस्तहीनो ग्रहः द्वे पादं द्विद्वेल्पं शुभं खेचरेन्द्रो नीचस्थोपि ना
स्तगो वा न किंचित्स्यादनन्तं न सविकोणोददातीति तदिदमाह कविः उच्चसंश्रयैरस्तख्यगैरिति च एवं सति यस्य जा
29 तकाले पंच प्रभृतयो ग्रहाः स्वोच्चस्थाः स देवतुल्यो भवति तदुक्तं हृदयस्यायेऽस्तगिवनः प्रहृष्टकाख्यो राज प्रतिरूप
कास्तु राजानः एकद्वित्रिचतुर्भिर्जायन्ते ततः परे दिव्याः इति तदिदमाह पंचभिरिति १३ दिश इति तत्त्वाणां नस्मि

अथ तस्य तनये समये शचीसमां त्रिसायनाशक्तिर्दिवौर्थमं द्वयम् १३ दिशः प्रसेदुर्मरुतो ववुः सुखाः प्र
दक्षिणार्चिर्हविरग्निराददे वभूव सर्वं शुभशंसि तत्क्षणो भवो हि लोकाभ्युदयाय तादृशाम् १४

तत्क्षणो अस्य तनयेन संयोगो द्वितीया दिशः प्रसेदुः प्रसन्ना वभूवुः मरुतो वाताः सुखा मनोहराः ववुः अग्निः प्रदक्षिणार्चिः ।
सन्हविराददे स्वीचकार इत्थं सर्वं शुभशंसि शुभसूचकं वभूव तथा हि तादृशां रघुप्रकाराणां भवो जन्म लोकाभ्यु
दयाय भवतीति शेषः ततो देवाश्चापि संतुष्टा इत्यर्थः १४ अरिष्टेति अरिष्टं सूतिकागृहमित्यमरः अरिष्टशय्या
तेपरितोऽभितः परितः समया निकषा हा प्रति योगेषु दृश्यत इति द्वितीया विसारिणा तज्जन्मनस्तस्य शिशो
र्निजेन नैसर्गिकेण तेजसा सहसा हतत्विषो निशीथदीपाः अर्धरात्रप्रदीपाः रात्रार्द्धोताः शुचिस्त्र अर्द्धरात्रनिशीथौ
द्वावित्यमरः आलेख्य चित्रे समर्पिता इव वभूवुः निशीथशब्दो दीपानां प्रभाग्यकाले संभावनार्थः १५ श्रीरामजी २४

जनायेति भूपतेरमृतसंमिताद्वरममृतसमानाद्वरं सरूपसमसंमिताइत्याह दंडी कुमारजन्मपुत्रोत्पत्तिं शंसतेक

थयते सुद्धांतचरायस्त्रेतः पुरचारिणोजनायत्रयमेवादेयमासीत् किंतत् शशिप्रभं छत्रमुभेचचामरे छत्रादीनां

राज्ञः प्रधानांगत्वादितिभावः १४ निवातेति निवातोनिर्वातप्रदेशः निवातावाश्रयावातावित्यमरः तत्र यत्पद्मन्तद्व

त्तिमितेन निस्पंदेन चक्षुषा कांतेसुतानननेपिबतः नृपस्यापद्मपतोनृपस्य गुरुरुत्कटः प्रहर्षकर्त्रीइंदुदर्शनाद्गु

रोर्महोदयेः पूरोजलौघइवात्मनि शरीरेनात्रभूववस्थानेनशशाकअत्तर्नमातिस्मेतियावत् नहाल्पाधारेपि

अरिष्टशय्यांपरितोविसारिणासुजन्मनस्तस्यनिजेनतेजसा निशीथदीपाःसहसाहतत्विषोवभूवु

रालेख्यसमर्पिताइव १५ जनायशुद्धांतचरायशंसतेकुमारजन्मामृतसंमिताक्षरं अदेयमासीत्र

यमेवभूपतेःशशिप्रभंछत्रमुभेचचामरे १६ निवातपद्मस्तिमितेनचक्षुषानृपस्यकांतंपिबतःसु

ताननं महोदयेः पूरइवेंदुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि १७ सजातकर्मण्यखिलेतपस्वि

नातपोवनादेत्यपुरोधसाकृते दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कारइवाधिकंबभौ १८

कंमीत्यतइतिभावः यद्वाहर्षआत्मनिस्वस्मिन्विषयेनप्रबभूव आत्मानंनियंतुंनशशाक किंतुबहिर्निर्जगामेत्या

र्थः १७ सइति सदिलीपसूनुःतपस्विनापुरोधसावसिष्ठेनतपस्वित्वात्तदनुष्ठितेकर्मणिसवीर्यंस्यादितिभावःत

पोवनादेत्यागत्याखिलेजातकर्मणिजातस्यकर्तव्येसंस्कारविशेषेकृतेसतिप्रयुक्तःसंस्कारःशाणोल्लेखना

दिर्यस्यसतथोक्तः आकरोद्भवःखनिप्रभवःखनिःस्त्रियामाकरःस्यादित्यमरः मणिरिवाधिकंबभौवसिष्ठमंत्रप्र

भावात्तेजिष्ठोभूदित्यर्थः अत्रमनुः प्राङ्नाभिवर्द्धनात्पुंसोजातकर्मविधीयतइति १८ श्रीरामचंद्रायनमोनमः

सवीक्ष्यपुत्रस्य चिरात्पुखं पिता निधानकुंभस्य युवेव दुर्गतः मुदाशरीरे प्रबभूव नात्मनः पयोधिरिंदूदयमूर्छितो यथा ४ सर्गे

र॰ वं॰ टी॰ ३॰ सुखश्रवाइति सुखकरः श्रवः श्रवणं येषां ते सुखश्रवाः श्रुतिसुखा इत्यर्थः मंगलतूर्यनिस्वना मंगलवाद्यध्वना।
यः वारयोषितां वेश्यानां वारस्त्री गणिका वेश्या रूपाजीवेत्यमरः प्रमोदनृत्यैः हर्षनृत्यैः सह मागधीपतेः दिली
पस्य सद्मनि केवलं गृह एव न व्यजृंभंत किंतु द्यौर्लोको येषां ते दिवौकसः पृषोदरादित्वात्साधुः देवास्तेषां पथ्या
काशेपि जृंभंत तस्य देवांशत्वाद्देवोपकारित्वाच्च देवदुंदुभयो नेदुरिति भावः १९ नेति रक्षितुः सम्यक्पालन
शीलस्य तस्य दिलीपस्य अतएव चोराद्यभावात् संयतो बद्धो न बभूव नास्ति स्म नाभूत् किंतु तेनात्मजाहवि सर्ज्जि
30 येदिति सुतजन्मना हर्षितः तोषितः सन् स्वयं बद्धं विसर्ज्जयेत् विमोचयेत् किंतु सराजा न दापितॄणां ऋणाभि

सुखश्रवा मंगलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् न केवलं सद्मनि मागधीपतेः पथिव्य
जृंभंत दिवौकसामपि १९ न संयतस्तस्य बभूव रक्षितुर्विसर्ज्जयेद्यं सुतजन्महर्षितः ऋणाभि
धानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बंधनात् २० श्रुतस्य यायादयमंतमर्भकस्तथा परे
षां युधि चेति पार्थिवः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् २१ राम

धानाद्धेयनात्केवलं यथा तथा स्वयमेव इत्यर्थः केवलः कृत्स्न एकश्च केवलश्चावधारिते इति शाश्वतः मुमुचे।
कर्मकर्त्तरि लिट् स्वयमेव मुक्त इत्यर्थः अस्मिन्नर्थे एष वाऽनृणो यः पुत्रीति श्रुतिः प्रमाणं २० श्रुतस्येति।
अर्थविच्छब्दार्थज्ञः पार्थिवः पृथिवीश्वरो दिलीपः अयमर्भको बालकः श्रुतस्य शास्त्रस्यांतं पारं यायात् तथा
युधि परेषां शत्रूणां पारं चांतं यायात् शत्रून्जयादित्यर्थः शकि लिङ् इति शक्यार्थे लिङ् इति हेतोः धातोः अगि रगि
लगि गत्यर्था इति लंघि धातोर्गमनाख्यमर्थं विचार्य अवेक्ष्य आलोच्य आत्मसंभवं पुत्रं नाम्ना रघुं चकार लंघिवंह्यो ३॰
र्नलोपश्चेत्युप्रत्यये यालमल् लघुर्वलोगुली नांवालोवत्वमापद्यते इति वैकल्पिके फादेशे रघुरिति रूपंसिद्धं
३१

पितुरिति सखुः समग्रसंपदः हर्गालक्ष्मीकस्य पितुर्दिलीपस्य प्रयत्नाच्छुभैर्मनोहरैः शरीरावयवैर्हरिदश्वदीधि-
तेः सूर्यस्य भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः इत्यमरः रश्मेरनुप्रवेशाद्बालचंद्रमा इव दिनेदिने प्रतिदि-
ने नित्यवीप्सयोरिति द्विर्वचनं वृद्धिं पुपोष अत्र संहितावचने सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो
नैशं हरपयंति दर्पणोदर इवनिहिताश्च मंदिरस्यांतरिति २२ उमेति उमावृषांकौ पार्वतीवृषध्वजौ शरजन्मना का-
र्त्तिकेयेन कार्त्तिकेयो महासेनः शरजन्मा षडाननः इत्यमरः यथा ननंदतुः शचीपुरंदरौ इंद्राणीन्द्रौ पुलोमजा श-

पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिनेदिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशा-
दिव बालचन्द्रमा २२ उमावृषांकौ शरजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा नृपः सा च सु-
तेन मागधी ननंदतुस्तत्सदृशेन तत्समौ २३ रथांगनाम्नोरिव भाववंधनं बभूव यत्प्रेम परस्परा-
श्रयम् विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत २४

ची इंद्राणीत्यमरः जयंतेन पाकशासनिना जयंतः पाकशासनिरित्यमरः यथा ननंदतुस्तथा तत्समौ ताभ्यां समौ उमावृ-
षांकाभ्यां शचीपुरंदराभ्यां च समौ सा मागधी सुदक्षिणा नृपश्च तत्सदृशेन ताभ्यां कुमारजयंताभ्यां तुल्येन सुतेन रघुणा
ननंदतुः मागधी व्याख्याता २३ रथांगेति रथांगनाम्नी च रथांगनामा च रथांगनामानौ चक्रवाकी चक्रवाकौ पु-
मान्स्त्रियेत्येकशेषः तयोरिव दंपत्योर्भाववंधनं हृदयाकर्षकं परस्पराश्रयं अन्योन्यविषयं यत्प्रेम बभूव तदे-
केन केवलेन ताभ्यामन्येन वा एके मुख्यान्यकेवलाः इत्यमरः एकोन्यार्थे प्रधाने च प्रथमे केवले तथा साधार-
णे समानेल्पे संख्यायां च प्रयुज्यते इति विश्वः सुतेन विभक्तमपि कृतविभागमपि परस्परस्योपरि पर्य ।।राम

ह्रीयत वद्वयेकर्मकर्त्तरि लट् अस्य विमत्वात्स्वयमेवोपचितमित्यर्थः यदेकाधारं वस्तु तदाधारद्वये विभज्यमानं ह्री
यते अत्र तु तयोः प्रागेकविषयं प्रेम संप्रति द्वितीयविषयलाभेपि नाह्रीयत प्रत्युतोपचितमेवाभूदिति भावः २४
र॰वं॰ उवाचेति सोर्भकः शिशुः पोतः पाकोर्भको डिंभः पृथुकः शावकः शिशुरित्यमरः धात्र्या उपमात्रा धात्री जननत्यम
टी॰ ३१ लकीवत्समस्तुपमात्रित्यपि विश्वः प्रथममादितः उपदिष्टं वच उवाच तदीयामङ्गुलिमवलम्ब्य ययौ च प्रणिपातस्य ययौ =
३१ शिक्षया उपदेशेन नम्रो भूदिति यत्नेन पित्रा दत्तं ततान २५ तमिति शरीरयोगजैः स्पर्शैः त्वचि त्वगिन्द्रिये सम्य
तं निषिंचितं वर्षन्तमिव तं पुत्रमंकमारोप्य मदाविर्भावात् उपांतयोः प्रांतयोः संमीलितलोचनः सन्नृपः त्वचि

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मु
दं तेन ततान सोर्भकः तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलित
लोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ २६ अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिम
न्तमन्वयम् स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः २७

तात्सुतस्पर्शरसज्ञतां ययौ रसास्वादः २६ अमंस्तेति स्थितेरभेत्ता मर्यादापालकः सन्नृपः परार्ध्यजन्मना उत्कृष्ट
जन्मनानेन रघुणात्मनान्वयं वंशं प्रजानां पतिर्ब्रह्मा गुणाः सत्वादयः गुणाः सत्वरजस्तमः शब्दमरः तेषु अग्रे गुणा
ग्र्येन सत्वेन वर्त्तते व्याप्रियत इति गुणाग्र्यवर्ती तेन स्वस्य मूर्त्तिभेदेनावतारविशेषेण विष्णुनात्मनः सर्गमि
व सृष्टिमिव स्थितिमन्तं प्रतिष्ठावन्तं अमंस्त मन्यतेस्म अनद्यतनत्वादिट् प्रतिषेधः अत्रोपमानोपमेययोरित
रेतरविशेषणानि योज्यानि तत्र रघुपक्षे गुणा विद्याविनयादयः गुणोप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे स्त ३१
भे सत्वादिसंध्यादिविद्यादिहरितादिष्विति विश्वः शेषं सुगमं २७ ॥ ॐ श्रीरामचंद्राय नमो नमः नमो नमः ॥

सइति चूडाकार्या द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोदनात् इति मनुस्मरणात् तृती
यवर्षे वृत्तचौलः निष्पन्नचूडाकर्मा सन् डलयोरभेदः स रघुः प्राप्ते च पंचमे वर्षे विद्यारंभं च कारयेदिति वचनात्
पंचमे वर्षे चलकाकपक्षकैः चंचलशिखंडिकैः बालानां तु शिखा प्रोक्ता काकपक्षः शिखंडक इति हलायुधः स
वयोभिः स्निग्धैः स्निग्धो वयस्यः सवया इत्यमरः अमात्यपुत्रैरन्वितः सन् लिपेः पंचाशद्वर्णात्मिकाया मातृकाया
यथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शब्दजातं नद्या मुखं द्वारं मुखं तु वदने मुख्यारंभे द्वाराभ्युपा
ययोरिति यादवः तेन कश्चिन्मकरादिः समुद्रमिवाविशत् प्रविष्टः ज्ञातवानित्यर्थः २८ अथेति गर्भाष्टमेप्रकुर्वी

सवृत्तचूडश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेने
वसमुद्रमाविशत् २८ अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् अवंध्ययत्ना
श्च बभूवुरर्भके क्रिया हि वस्तूपहिता प्रसीदति २९

तब्राह्मणस्योपनायनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश इति मनुस्मरणात् अथ गर्भैकादशेऽब्दे विधिवदुप
नीतं कृतोपनयनं गुरुप्रियमेनं रघुं विपश्चितो विद्वांसो गुरवो विनिन्युः शिक्षितवंतः ते गुरवोऽत्रास्मिन् अर्भके अवंध्ययत्ना
श्च बभूवुः तथाहि क्रिया शिक्षा क्रियातुनिष्कृतौशिक्षाचिकित्सोपायकर्मस्विति यादवः वस्तूनि पात्रभूते उप
हिता प्रयुक्ता प्रसीदति फलति क्रिया हि द्रव्यं विनयति नाद्रव्यमिति कौटिल्यः २९ धिय इति अत्र कामंदकः शु
श्रूषा श्रवणं चैव ग्रहणं धारणं तथा ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणा इति आन्वीक्षिकी त्रयी वार्ता दंड
नीतिश्च शाश्वती एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतव इति च उदारधीः उत्कृष्टबुद्धिः स रघुः समग्रैर्गुणैर्येर्गु
रोश्चत्वारोऽर्णवाः उपमा यासां ताश्चतुरर्णवोपमाः तद्धितार्थोत्तरपदसमाहारे चेति उत्तरपदसमासः चतस्रो वि

रघु टी ३

स्वामीश्वरः सूर्यः पवनातिपातिभिर्हरिद्भिर्निजाश्वैः हरित्कपिलवर्णे वत्सावाजिविशेषयोरिति विश्वः चतस्रो दिश इ
ति क्रमात्तनाव चतुर्वर्णोपमत्वं दिशामपि द्रष्टव्यं ३० त्वचमिति कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः व
सीरन्नानुपूर्व्येण शाणक्षौमादिकानि च इति मनुस्मरणात् मेध्यां शुद्धां रौरवीं रुरुसंबंधिनीं रुरुर्महाकृष्णसार
र॰वं॰ इत्यादवः त्वचं चर्म परिधाय वसित्वा मंत्रवन्मंत्रकम् अस्त्रमाग्नेयादिकं पितुरेवोपाध्यायात् अशिक्षितास्थ
टी॰३२ स्तवान् आख्यातोपयोगे इत्यपादानसंज्ञा पितुरेवेत्यवधारणमुपपादयति नेति न तु गुरुरेकः पार्थिवः केवलं पृथि
32 वीश्वर एव नाभूत् किंतु सद्वितीय एकधनुर्द्धरोप्यभूत् ३१ महोक्षतामिति रघुः क्रमाद्यौवनभिन्नशैशवो निरस्त

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः पवनातिपातिभिर्दिशो हरि
द्भिर्हरितामिवेश्वरः ३० त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवत् न केवलं तद्गुरुरे
कपार्थिवः क्षितावभूदेकधनुर्द्धरोऽपि सः ३१ महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रय
न्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३२ अथास्य गोदानविधेरनंतरं विवाह
दीक्षां निरवर्तयद्गुरुः ॥

शिशुभावः सन्महांश्चासावुक्षा महोक्षो महर्षभः अचतुरादिसूत्रेण निपातनादकारान्तत्वं तस्य भावस्तत्तां स्पृशन् गा
च्छन् वत्सतरो दम्यवत्सतरौ समाविति अमरः द्विपेंद्रभावं महागजत्वं श्रयन् भजन् कलभः करिपोतक इव गांभीर्येण गा
चापलेन मनोहरं वपुः पुपोष ३२ अथेति गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः स्त्री तु स्यादिशि भारत्यां भूमौ
च सुरभावपि पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु इति केशवः गावो लोमानि दीयन्ते खण्ड्यन्तेऽस्मिन्नि ३२
ति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्तव्यं केशान्ताख्यं कर्मोच्यते तदुक्तं मनुना केशान्तः
षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः इति अथ गुरुः पिता गुरुर्गीष्पतिपित्रादावि

अस्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयत् कृतवानित्यर्थः अथ नरेन्द्रकन्यास्तं रघुं दक्षस्य सुता रोहिण्याद
यः तमोनुदं चन्द्रमिव तमोनुद्दीप्ते चन्द्रार्कौ इति विश्वः सत्पतिमवाप्याबभुः रघुरपि तमोनुत् अत्र मनुः वेदानधीत्य
वेदौ वा वेदं वापि यथाक्रमं अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेदिति ३३ संप्रति यौवराज्ययोग्यतामाह युवे
ति युवा युगो नाम रथ्यस्कंधगतः सच्छिद्र दर्शनीयो यानाङ्गभूतो दारुविशेषः यानाद्यङ्गे युगः पुंसि युगं युग्मे कृ
तादिष्वित्यमरः युगवद्व्यायतौ दीर्घौ बाहू यस्य सः अंसावस्य स्त इत्यंसलो बलवान् मांसलश्चेति वृत्तिकारः बला
न्मांसलोंऽसल इत्यमरः वत्सांसाभ्यां कामबले इति वलच्प्रत्ययः कपाटवक्षाः विस्तीर्णहृदयः परिणद्धकंधरः

नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ३३ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः
परिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३४ ततः प्रजानां चिरमा
त्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्द भाक्

विशालग्रीवः परिणाहो विशालतेत्यमरः रघुर्वपुषः प्रकर्षादाधिक्याद्यौवनकृताद्गुरुं पितरमजयत् तथापि
विनयान्नम्रत्वेन नीचैरल्पकोऽदृश्यत एतेनास्य अनौद्धत्यं च विवक्षितं ३४ संप्रति तस्य यौवराज्यमाह तत
इति आत्मना चिरं धृतां नितान्तगुर्वीं वोतो गुणवचनादिति ङीष् प्रजानां धुरं पालनप्रयासं लघयिष्यता लघुं
करिष्यता तत्करोति तदाचष्टे इति लघुशब्दाण्णिच् ततो लृटः सद्वेति शतृप्रत्ययः नृपेण दिलीपेन असौ
रघुः निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतो नम्र इति हेतोः युवराजशब्दं भाज
यतीति तथोक्तः भजो ण्विरिति ण्विप्रत्ययः चक्रे कृतः द्विविधो विनयः स्वाभाविकः कृत्रिमश्चेति कौटिल्यः तदु

स्या॰

अत्र कामंदकः विनयोपग्रहान्भृत्यै कुर्वीत नृपतिः सुतान् अविनीतकुमारं हि कुलमाशु विशीर्यते विनीतमौरसं पुत्रं यौव
राज्येऽभिषेचयेदिति ३५ नरेन्द्रमूलेति गुणान्विनयादीन् सौरभादींश्चाभिलषतीति गुणाभिलाषिणी श्रीः राज्य
लक्ष्मीः पद्माश्रया च नरेन्द्रो दिलीप एव मूलायतनं प्रधानस्थानं तस्मादपादानादनंतरं सन्निहितयुवराज्यइति सं
र॰वं॰ ज्ञा यस्य संज्ञा जाता युवराजसंज्ञितं तदास्पदं तारकादित्वादितच् प्रत्ययः आत्मनः पदं स्थानमास्पदम् आस्पदं प्रति
टी ३३ ष्ठायामिति निपातः तद्रघुरित्यास्पदं कमलाच्चिरोत्पन्नान्नवावतारं अचिरोत्पन्नमुत्पलमिव अंशेनागच्छत् श्रियो
33 हि पूर्तिरज्येन इति भावः ३६ विभावसुरिति सारथिना सहायभूतेन एतद्विशेषणमुत्तरवाक्येष्वप्यनुषंजनीयं
तेन वायुना विभावसुर्वह्निरिव सूर्यवह्नी विभावसू इत्यमरः घनव्यपायेन शरत्समयेन सारथिना गभस्तिमानिव

नरेन्द्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितम् अगच्छदंशेन गुणाभिलाषिणी नवावतारं
कमलादिवोत्पलम् ३६ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव बभूव तेनातित
रां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ३७ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम्
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ३८

गंडः॰

मिव कटो गंडः करटो मदो दानमित्यमरः तस्य प्रभेदः स्फुटनं मदोदय इत्यर्थः तेन करीव पार्थिवो दिलीपस्तेन रघु
णातितरामत्यंतं सुदुःसहः सुष्ठु असह्यो बभूव ३७ नियुज्येति शतक्रतुर्महेंद्रस्तदुपमा यस्य सः शतक्रतूपमः स
दिलीपः शतं वै तुल्या राजपुत्रा देवा आशापाला इति श्रुत्या राजसुतैरनुद्रुतमनुगतं धनुर्धरं तं रघुं होमतुरंगा ३२
णां रक्षणे नियुज्य एकेन क्रतुना अपूर्णमेकोनं क्रतूनां नाम च मेधानां शतमपविघ्नमपगते विघ्ने यथा तथा आप ३८

तत इति ततः परमेकोनशतक्रतुप्राप्त्यनंतरं यज्वना विधिनेष्टवता तेन दिलीपेन पुनरपि मखाय मखं कर्तुं क्रियार्थेत्यादिना चतुर्थी उत्सृष्टमुन्मुक्तमनर्गलमप्रतिबंधमव्याहतस्वैरगतिमित्यर्थः अपर्यावर्त्यंते इत्यमन्तचरंतीत्याप स्तंबस्मरणा त् तुरंगं धनुर्भृतां रक्षिणां रक्षकाणामग्रत एव शक्रो गूढविग्रहः सन्जहार किलेत्यैतिह्ये ४९ विषादेति तत्कुमार सैन्यं सेना सपदि विषादः इष्टनाशकृतो मनोभंगः यदुक्तं विषादश्चेतसो भंग उपायाभावनाशयोरिति तेन लुप्तः प्र तिपत्तिः कर्तव्यज्ञानं यस्य तत्तथोक्तं विस्मितं अश्वनाशस्याकस्मिकत्वादाश्चर्याविष्टं संस्थितं तत्स्यो अथ श्रुतप्रभावाय

ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढ विग्रहः ४९ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् वसिष्ठधेनुश्च यदृच्छयागता श्रु तप्रभावा ददृशेथ नंदिनी ५० तदंगनिस्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां अतीन्द्रिये ष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनंदनः ५१

यदृच्छया स्वेच्छया आगता नंदिनी नाम वसिष्ठधेनुश्च ददृशे रघोः प्रसादलब्धत्वादनजि हृत्वायेतिभावः ह्वौ चका रावविलंबसूचकौ ५० तदिति सतां पुरस्कृतः पूजितः दिलीपनंदनो रघुः पुण्येन तस्या नंदिन्या यदंगं तस्य निस्यं दो द्रवः स एव जलं तेन लोचने प्रमृज्य शोधयित्वा अतीन्द्रियेषु इन्द्रियाणामपि तिक्रांतेषु अत्याद यः क्रांताद्यर्थे द्वितीययेति समासः द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिंगता प्रतिषेधाद्विशेष्यलिंगत्वं भावेषु वस्तुष्वप्युपपन्नदर्शनः संपन्नसाक्षात्कारशक्तिर्बभूव ५१ स इति नरदेवसंभवः सरघुः पुनः पुनः स तेन नि षिद्ध चापलं निवारितो द्धत्यं रथ स्यरश्मिभिः प्रग्रहैः किरणा प्रग्रहो रश्मीरत्यमरः संयतं अश्वं वहंतं हरंतं पर्वन पद्वारं

शतैरिति रघुस्तमश्वहर्त्तारं अनिमेषदृग्भिर्निमेषव्यापाररहितैः अक्ष्णां शतैः हरिं हरीणां हरिर्वाच्यवदाख्यातो हरिर्हंकपि
लवगौयोरिति विश्वः हरिमिंद्रं विदित्वा हरिर्वातार्कचंद्रेंद्रयमोपेंद्रमरीचिष्विति विश्वः एनमिंद्रं गगनस्पृशा व्योम
र०वं० व्यापिना धीरेणा गंभीरस्वरेणाध्वनिनेव निवर्त्तयन्निवावोचत ४३ मखेति हे देवेंद्र मनीषिभिस्त्वमेव मखांशभा
टी ३४ जां यज्ञभागभुजां प्रथमः सदा निगद्यसे कथ्यसे तथाप्यजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य मद्गुरोः क्रिया-
35 विघाताय क्रतुविघ्नाय क्रियो विहन्तुमित्यर्थः तुमर्थाभाववचनादिति चतुर्थी कथं प्रवर्त्तसे ४४ त्रिलोकेति

सपूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः पुनः पुनः सूतनिषिद्धचापलं हरंतमश्वं रथरश्मिसंयुतम्
४२ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः अवोचदेनं गगनस्पृशा रघुः स्वरेण
धीरेण निवर्त्तयन्निव ४३ मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे अजस्रदीक्षाप्रयत
स्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे ४४ त्रिलोकनाथेन सता मखद्विषस्त्वया नियम्या ननु दिव्यचक्षु
षा सचेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ४५

त्रयाणां लोकानां नाथस्त्रिलोकनाथः तद्धितार्थेत्यादिना उत्तरपदसमासः तेन त्रैलोक्यनियामकेन दिव्यचक्षुषा
अतीन्द्रियार्थदर्शिना त्वया मखद्विषः क्रतुविघातकाः सदा नियम्या ननु शिक्ष्याः खलु लोके सत्त्वं धर्मचारिणां क
र्मसु क्रतुषु स्वयमंतरायो विघ्नो भवसि चेत् विधिर्यज्ञानुष्ठानं च्युतः नष्टः लोके सत्कर्मकथैवास्तमियादित्यर्थः ।
४५ तदिति हे महाभाग तत्तस्मात्कारणात् महाक्रतोरश्वमेधस्याग्र्यं श्रेष्ठमंगं साधनममुं तुरंगं प्रतिमोक्तुं प्रतिदातु ३४
मर्हसि तथाहि चेतः पथोपदेशयितारः सन्मार्गप्रदर्शकाः ईश्वरा महांतः मलीमसां मलिनां पद्धतिं नाददते न स्वीकुर्वते
असन्मार्गेनावलंबंते इत्यर्थः मलीमसं तु मलिनं कच्चरं मलदूषितमित्यमरः ४६ ॥ श्रीरामचंद्राय नमो नमः ॥

इतीति इति रघुणा समीरितं प्रगल्भं वचो निशम्याकर्ण्य दिवौकसः स्वर्गौकसः दिवं स्वर्गं गतविद्धेति विग्रहः तेषामधिपतिर्दे
वेन्द्रो रघुप्रभावात् सविस्मयः सन् रथं निवर्त्तयामास उत्तरं प्रतिवक्तुं प्रचक्रमे च ४७ यदिति हे राजन्यकुमार त्वं यत्कु
मार मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराडित्यमरः यदात्थ अमात्य ब्रवीषि ब्रुवः पंचानामित्यादिनाऽऽहादेशः
तत्तथा सत्यं किं तु यशोधनैः रक्ष्यं परतः शत्रुतो यशो रक्ष्यं ततः किमत आह भवद्गुरुस्त्वत्पिता जगत्प्रकाशं लो
कप्रसिद्धमशेषं सर्वं मम तद्यशः इज्यया यागेन लंघयितुं तिरस्कर्तुमुद्यतः उद्युक्तः ४८ किं तद्यश इत्याह हरिरि

तदंग सर्गं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते
न पद्धतिम् ४६ इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् निवर्त्तयामास रथं स
विस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ४७ यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः ज
गत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लंघयितुं ममोद्यतः ४८ हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्व
रस्त्र्यंबक एव नापरः तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ४९

ति पुरुषेषु उत्तम इति सप्तमीसमासः न निर्द्धारणे इति षष्ठीसमासनिषेधात् कर्मधारये तु सन्महत्परमोत्तमो
त्कृष्टाः पूज्यमानैरिति उत्तमपुरुष इति स्यात् यथा हरिर्विष्णुरेक एव पुरुषोत्तमः स्मृतः त्र्यंबकः शिव एव महेश्वरः
स्मृतः न परः अपरः पुमान् न तथा स्मृतः तथा मां मुनयः शतक्रतुं विदुः वदंति विदो लटो वेति झेरुसादेशः नोऽस्माकं
२८ हरिहरयोर्मम चेत्यर्थः एव वितयोपि शब्दो द्वितीयगामी न हि द्वितीयप्रकरणे गामिगम्यादीनामुपसंख्यानात् समासः ना८
४९ अत इति यतोऽहमेव शतक्रतुः अतस्त्वदीयस्य पितुः अयं शततमोऽश्वः कपिलानुसारिणा कपिलमुनित

लेनमयाश्वपहारितोयहृतः अपहारितइतिस्वार्थेणिच् तवात्राश्वे प्रयत्नेनालंप्रयत्नंमाकार्षीरित्यर्थः निषेध्यस्य
निषेधंप्रतिकरणत्वात्तृतीया सगरस्यराज्ञःसंततेःसंतानस्यपदव्यांपदंमानिधाःमानिधेहिइतिनिपूर्वाद्दधातेर्लुङ्
नमाङ्योगेइत्यडागमप्रतिषेधः महद्दास्कंदनेतेविनाशस्त्वलंभवेदितिभावः ५० ततइति ततस्तुरगस्यरक्षितार
र॰ वं॰ घुःप्रहस्यप्रहासंकृत्वा अपभयःनिर्भीतःसन्पुनःपुरंदरंबभाषेकिमितिहेदेवेंद्र एषअश्वमोचनरूपस्तवसर्गो
टी॰ ३५ निश्चयोयदिसर्गःस्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिष्वित्यमरः तर्हिशस्त्रंगृहाण भवान्रघुमामनिर्जित्यकृतम
नेनेतिकृतीकृतकृत्योनखलु इष्टादिभ्यश्चेतिइनिप्रत्ययः रघुग्रहणादात्मनोऽजेयत्वंसूचयति ५१ सइतिस

अथोयमश्वःकपिलानुकारिणापितुस्त्वदीयस्यमयापहारितः अलंप्रयत्नेनतवात्रमानिधाःपदंपदव्यांसगरस्य नि ५
संततेः ५० ततःप्रहस्यापभयःपुरंदरंपुनर्बभाषेतुरगस्यरक्षिता गृहाणशस्त्रंयदिसर्गएषतेनखल्वनि
र्जित्यरघुंकृतीभवान् ५१ सएवमुक्त्वामघवंतमुन्मुखःकरिष्यमाणःसशरंशरासनं अतिष्ठदालीढ
विशेषशोभिनावपुःप्रकर्षेणविडंबितेश्वरः ५२ रघोरवष्टंभमयेनपत्रिणाहृदिक्षतोगोत्रभिदप्यम
र्षणः नवांबुदानीकमुहूर्तलांछनेधनुष्यमोघंसमधत्तसायकम् ५३

रघुःउन्मुखःसन्मघवंतमिंद्रमेवमुक्त्वाशरासनंचापंसशरंकरिष्यमाणः आलीढिनआलीढाख्येनस्थानभे
देनविशेषशोभिनाअतिशयशोभिनावपुःप्रकर्षेणदेहौन्नत्येनविडंबितेश्वरः अनुकृतपिनाकीसन्नतिष्ठत् आ
लीढलक्षणोक्तिर्यादवः स्थानानिधन्विनांपंचतत्रवैशाखमस्त्रियाम् त्रिवितस्त्यंतरौपादौमंडलंतोरणाकृती।
अन्वर्थंस्यात्समपदमालीढंतुततोयतः दक्षिणोवाममाकुंच्यप्रत्यालीढंविपर्ययइति ५२ रघोरिति रघोर
वष्टंभमयेनस्तंभरूपेण अवष्टंभःस्तंभोरौचस्तंभआरंभयोरपीतिविश्वः पत्रिणाबाणेनहृदिहृदयेक्षतोविद्धः
अतएवामर्षणःसहनःक्रुद्धइत्यर्थः गोत्रभिदपिइंद्रोपिसंभवनीयेचौरेपिगोत्रःक्षोणीध्रेनामतइतिविश्वः
नवांबुदानामानीकस्यवृंदस्यमुहूर्तंक्षणमात्रंलांछनेचिह्नभूतेधनुषिदिव्येधनुषीत्यर्थः अमोघमवंध्यंसाय ३५

दिलीपेति भीमानां भयंकराणामसुराणां शोणितेन उचितः परिचितः स आशुगः सायकः दिलीपसूनोः रघोर्बृहद्भुजान्तरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वमनास्वादितं सुप्सुपेति समासः मनुष्यशोणितं कुतूहलेनेव पपौ ५४ हरेरिति कुमारस्य स्कन्दस्य विक्रम इव विक्रमो यस्य स तथोक्तः सप्तम्युपमानपूर्वपदस्येत्यादिना समासः कुमारोऽपि हरेरपि सुरद्विपस्यैरावतस्यास्फालनेन ताडनेन कर्कशा अङ्गुलयो यस्य सः तस्मिन् शच्याः पत्रविशेषकैरङ्किते शचीपत्रविशेषकाङ्किते हरेरिन्द्रस्य भुजे स्वनामचिह्नं स्वनामाङ्कितं सायकं निचखान निखातवान् निष्कण्टकराज्यमन्तराये महानभिभव इति भावः ५५ जहारेति अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण शक्रस्येन्द्र-

दिलीपसूनोः स बृहद्भुजान्तरं प्रविश्य भीमासुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूहले-
नेव मनुष्यशोणितम् ५४ हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ भुजे श-
चीपत्रविशेषकाङ्किते स्वनामचिह्नं निचखान सायकम् ५५ जहार चान्येन मयूरपत्रिणा शरेण श-
क्रस्य महाशनिध्वजम् चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ५६ तयोरुपान्त-
स्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च

स्य महाशनिरूपं ध्वजं महान्तमशनिरूपं ध्वजं जहार चिच्छेद स शक्रः सुरश्रियः देवलक्ष्म्याः प्रसह्य बलात्कृत्य केशानां व्यपरोपणादवतारणात् छेदनादिव तस्मै रघवे भृशमत्यर्थं चुकोप तं हन्तुमियेषेत्यर्थः क्रुधद्रुहेत्यादिना संप्रदानाच्चतुर्थी ५६ तयोरिति जयैषिणोस्तयोरिन्द्ररघ्वोः गरुत्मन्तः पक्षवन्तः गरुत्पक्षच्छदाः पत्रमित्यमरः आशीविषा आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः सर्पाः पृषोदरादित्वात्साधुः आशीरुरगदंष्ट्रायामित्यमरः तद्वत् भीमदर्शनाः सपक्षाः सर्पा इव भयावहा इत्यर्थः तैरधोमुखैरूर्ध्वमुखैश्च पत्रिभिरुपर्यधोदेशावस्थितत्वादिति

श्रतीति वासवः श्रुतिप्रबन्धेनातिसातत्येन प्रहिताभिः प्रयुक्ताभिः शरवृष्टिभिः दुःप्रसहस्य दुःखेन प्रसह्यत इति दुःप्रस
हे तस्य दुःप्रसहस्य दुःखेनाप्यसह्यस्येत्यर्थः तेजसः प्रतापस्याश्रयं रघुं अम्बुदोद्भिः स्वतश्च्युतैर्वह्निमिव ५८ निर्वापयि ५८९
र॰वं॰ तुं तेन शशाक रघोरपि लोकपालात्मकत्वेनेन्द्रस्यांशसंभवत्वादिति भावः ततइति ततो रघुः हरिचन्दनांकिते प्रको
टी॰३६ ष्ठे मणिबन्धे प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवस्येव धीरे गंभीरे नदतीति तां तथोक्तां वेवेष्टि ज्यामानी
त सर्ग ति विड्व्यापकमोजो यस्य सः विडोजसः इन्द्रस्य षोदरादित्वात्साधुः शरासनज्यां धनुर्मौर्वीं शशांकसदृशं चेद्रइव
36 मुखं फलं यस्य तेन पत्रिणा शरेणालुनात् अच्छिनत् ५९ सइति विवृद्धमत्सरः विरुद्धे वैरः सरं द्वः चापमुत्सृज्य

अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवा
द्भिरम्बुदः ५८ ततः प्रकोष्ठे हरिचन्दनांकिते प्रमथ्यमानार्णवधीरनादिनीम् रघुः शशांकार्धमुखेन पत्रि
णा शरासनज्यामलुनाद्बिडौजसः ५९ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः म
हीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ६० रघुर्भृशं वक्षसि तेन ताडितः पपात भू
मौ सह सैनिकाश्रुभिः निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ६१

प्रबलस्य विद्विषः शत्रोः प्रणाशनाय वधाय महीध्रा धारयंतीति महीध्राः पर्वताः मूलविभुजादित्वात्कप्रत्ययः तेषां
पक्षव्यपरोपणे पक्षच्छेदने उचितं स्फुरत्प्रभामण्डलमस्त्रं वज्रायुधमाददे जग्राह ६० रघुरिति रघुस्तेन वज्रे
णाभृशमत्यर्थं वक्षसि ताडितो हतः सन् सैनिकानामश्रुभिः सह भूमौ पपात तस्मिन्पतिते रुरुदुरित्यर्थः निमे
षमात्रात्तद्व्यथां दुःखमवधूय निरस्य सैनिकानां हर्षेण निःस्वनाः क्ष्वेडाः तैः सह उत्थितश्च तस्मिन्नुत्थिते हर्षा ३६
त्सिंहनादांश्चक्रुरित्यर्थः क्ष्वेडा तु सिंहनादः स्यादित्यमरः ६१ तथापीति तथापि वज्राघातेपि शस्त्राणां व्यवहा
रेणाव्यापारेणानिष्ठुरे विपक्षभावे शत्रुत्वे चिरं तस्थुषः स्थितवतोऽस्य रघोर्वीर्यातिशयेन हृतो हृतवानिति हृतहरो ब्रह्म

स्वयंवीर एववीरं जानातीतिभावः नन्वकथं शत्रोः संतोषः अतआह यदमितिगुरोः सर्वत्रशत्रुमित्रोदासीनेषुपदमंघ्रिर्नीयथीय
तेगुरोः सर्वत्रसंक्रमणतश्शत्रूर्थः गुणाःशत्रूनप्यावर्ज्जयंतीतिभावः ६२ असंगमितिसारवन्नयागुरुत्वेनाद्विषमप्यसंगमप्र
तिवेधंमे आयुधंवज्रंत्वदन्येननविसोढं अतोमांप्रीतंत्वष्टमवेहित्वंरंगमाहटतेनवरे गंवर्ज्जयित्वाअन्याघादितवर्णीरितिपं
चमीकिमिच्छसीतियदिस्फुटंवासवआहनरंगमादन्यददेयंनास्तीतिभावः ६३ ततइति ततोनरेन्द्रस्सूनुः रघुर्निषंगात्तू
णीरादसमग्रयद्यातयोद्धृतं स्ववर्णपुंखयःक्षतिभिः रंजितानांगुलयोयेनतमिषुंप्रतिसंहरन्निवर्तयन्नाह प्रहरेत प्रहरे
दितिनिषेधादितिभावः प्रियंवदतीतिप्रियंवदः प्रियवशेवदः खजितिखच्प्रत्ययः अरुर्द्विषेत्यादिनामुमागमः हरे ।

तथापिशस्त्रव्यवहारनिष्ठुरेविपक्षभावेचिरमस्यतस्युषः ततोषवीर्यातिशयेनहृत्रहापदेहिसर्वत्रगुरोर्निधी
यते ६२ असंगमद्रिष्वपिसारवत्तयानमेत्वदन्येनविसोढमायुधम् अवेहिमांप्रीतमृतेतुरंगमात्किमिच्छसीति
ति तमाहवासवः ६३ ततोनिषंगादसमग्रमुद्धृतंसुवर्णपुंखद्युतिरंजितांगुलिम् नरेन्द्रसूनुःप्रतिसंहरन्
निषुंप्रियंवदंप्रत्यवदत्सुरेश्वरम् ६४ अमोच्यमश्वंयदिमन्यसेप्रभोततःसमाप्तेविधिनैवकर्मणि अज
स्रदीक्षाप्रयतःसमेगुरुःक्रतोरशेषेणफलेनयुज्यताम् ६५ यथाचवृत्तांतमिमंसदोगतस्त्रिलोचनैकांशतया

स्वरंप्रत्यवदत ततआहहरेदितिभावः ६४ अमोच्यमितिहेप्रभोइन्द्र अश्वममोच्यमन्यसेयदि ततस्तर्हि अजस्रदीक्षायां
प्रयतःसमेगुरुःममपिताविधिनैवकर्मणिसमाप्तेसतिक्रतोर्यागस्ययत्फलंतेननफलेनाशेषेणाकृत्स्नेनयुज्यतांयुक्तो
स्तु अश्वमेधफललाभेकिमश्वेनेतिभावः ६५ यथेतिसदोगतःसदोगृहंगतःसभागृहंगतःत्रिलोचनस्येश्वरस्यए
कांशतयाअष्टानामन्यतममूर्तित्वाद्दुरासदोमाहेशेडुःप्रापोविशांपतिर्यथेमंवृत्तांतंतवंसदेशाद्दूताद्दातार्हवादेवश्रो
रोतिचहेलोकेशइन्द्रतथाविधीयतां ६६ तथेति मातलिःसारथिः इन्द्रःरघोःसंदेशिनेकामंमनोरथंतथेति तथास्त्विति
प्रतिशुश्रुतवान्प्रतिश्रुतवान्भाषायांसदवसश्रुवइतिक्वसुप्रत्ययः यथागतेयथोक्तदिगागतः ॥ श्रीरामचन्द्रायनमः

नृरघुरपिनातिप्रमनाःविजयलाभेप्यश्वनाशान्नातीवहृष्टः सन् नजर्थस्य नशब्दस्य सहसुपेति समासः नृपस्य सदोगृहं

प्रतिन्यवर्त्तत ६७ तमिति हरेरिंद्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबोधितः ज्ञापितः वृत्तांतमिति शेषः प्रजेश्वरो दि

लीपः हर्षजडेन हर्षशिशिरेण पाणिना कुलिशव्रणांकितं तस्य रघोरिदं तदीयमंगं शरीरं परामृशन् तं रघुमभ्यनंद

र.वं. न् ६८ इतीति इति हेतुप्रकरणप्रकाशादिसमाप्तिष्वित्यमरः महनीयशासनः एकोनशताश्वमेधान्क्रतून्

टी३७ नामस्वमेधानां नवभिरधिकां नवतिं एकोनशतमायुषः क्षये सति दिवं स्वर्गं समारुरुक्षुः आरोढुमिच्छुः सोपानानां

37 परंपरां पंक्तिमिव तनुतान ६९ अथेति अथ विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः स दिलीपो यथाविधि यथाशास्त्रं यूने

तेवेवमंदेशहृदाह्रिंशांपतिःशृणोति लोकेशतथाविधीयताम् ६६ तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं

मातलिसारथिर्ययो नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्त्तत ६७ तमभ्यनन्दत्प्रथ

मं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः परामृशन् हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकितं

म् ६८ इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः समारुरुक्षुर्दिवमायुषः क्षयेतता

वृ४२ नसोपानपरंपरामिव ६९ अथ स विषयव्यावृत्तात्मा यथाविधिसूनवे नृपतिककुदं दत्वा यूने सितातप

वारणम् मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ७० ३

सूनवे नृपतिककुदं राजचिह्नं ककुच्च ककुदं श्रेष्ठे वृषांके राजलक्ष्मणीति विश्वः सितातपवारणं श्वेतछत्रं दत्वा तया

देव्या सुदक्षिणया सह मुनिवनतरुच्छायां सिश्रिये श्रितवान् वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः तथा गलितवयसा ३७

वृद्धानामिक्ष्वाकूणां इक्ष्वाकोर्गोत्रापत्यानां तद्राजसंज्ञकत्वाद्बहुषु लुक् इदं वनगमनं कुलव्रतं देव्या सहेत्यनेन

सपत्नीकवानप्रस्थाश्रम उक्तः तथा च याज्ञवल्क्यः सुतविन्यस्तपत्नीकस्तया वानुगतो वनं वानप्रस्थो ब्रह्मचारी